सिद्धांत

लघुकौमुदी ~~पूर्वार्द्ध~~:

उत्तरार्द्धः

१८७

६१
इ:
८१

च२ लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो लकारश्छंदोमात्रगोच
रः लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः अकर्मके
भ्यो भावे कर्तरि च वर्तमाने लट् अटौ इतौ उच्चारणसामर्थ्याल्लस्य नेत्वं लस्य अधिकारो
यं भूसत्तायां कर्तृविवक्षायां भू ल् इति स्थिते तिप् तस् झि सिप् थस् थ मिप् वस् मस् म
स् त आतां झ थास् आथां ध्वं इड् वहि महिङ् इत्येतेष्टादश लस्यादेशाः स्युः लः पर
स्मैपदं संज्ञा स्युः तङानावात्मनेपदं तङ् प्रत्याहारः शानच् कानचौ चात्मनेपदसंज्ञौ ।
लः पूर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित् तदन्ताद्धा त
तोर्लस्यात्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञितश्च ।
धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनि
मित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ उभ । त्रीणि १०
योः परस्मैपदात्मनेपदयोस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येक
शः लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकं वचनादिसंज्ञानि स्युः युष्मद्यु

ल॰ कौ॰ २॰ पपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मद्युपपदे प्रयु
ज्यमानेऽप्रयुज्यमानेपि मध्यमपुरुषः स्यात् अस्मद्युत्तमः तथाभूतेऽस्मद्युत्तमः शेषे प्रथ
मः भूति इति जाते तिङ्शित्सार्वधातुकं तिङः शितश्च सार्वधातुकसंज्ञा कर्तरि शप् क
र्त्रर्थे सार्वधातुके धातोः शप् सार्वधातुकार्धधातुकयोः अनयोः परयोरिगन्ताङ्गस्य गुणः ग
अवादेशः भवति भवतः झोऽन्तः प्रत्ययावयवस्य झस्यान्तादेशः स्यात् अतो गुणे भवंति
भवसि भवथः भवथ अतो दीर्घो यञि अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके परे भवामि भ
वावः भवामः स भवति तौ भवतः ते भवंति त्वं भवसि युवां भवथः यूयं भवथ अहं
भवामि आवां भवावः वयं भवामः शेषे विभाषाकखादावषांत उपदेशे उपदेशे का
दिखादिषांतवर्ज्जे गादन दादेः तस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णो वा
स्यात् प्रनिभवति प्रणिभवति परोक्षे लिट् भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्
लस्य तिबादयः लिट् च लिडादेशस्तिङ् आर्धधातुकसंज्ञः स्यात् तेन शबादयो न परस्मै
पदानां णलतुसुस्थलथुसणल्वमाः लिटस्तिबादीनां णलादयः स्युः भू अ इति स्थि २॰

ते भुवो वुग्लुङ्लिटोः श्रुवि लिटि धातोरनभ्यासस्य लिटि परे ऽनभ्यासस्य धातोरवयवस्यैकाचः
प्रथमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य भूव् भूव् इति स्थिते पूर्वोऽभ्यासः अत्र ये अ२
द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् हलादिः शेषः अभ्यासस्यादिर्हल् शिष्यते अन्ये ह अ३
लो लुप्यन्ते ह्रस्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासोकारस्य अः स्यात् लि
टि अभ्यासे चर्च अभ्यासे झलां चरः स्युर्जशश्च झलां जशः खयां चरः इति विवेकः बभूव
बभूवतुः बभूवुः आर्धधातुकस्येड्वलादेः वलादेरार्धधातुकस्येट् स्यात् बभूविथ बभूवथुः
न७ बभूव बभूव बभूविव बभूविम अनद्यतने लुट् भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात् स्यता
रैतौ ८ सी लृलुटोः धातोः स्यतासी लृलुटोः परतः शबाद्यपवादः लृ इति लृङ्लृटोर्ग्रहणं आर्धधातुकं शे
षः तिङ्शिदन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः लुटः प्रथमस्य डारौरसः डि
त्त्वसामर्थ्यादभस्यापि टेर्लोपः भविता तासस्त्योर्लोपः सोदादौ प्रत्यये परे रि च रादौ प्रत्यये
तथा भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भ
वितास्मः लृट् शेषे च भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च । स १

लं॰
कौ॰
२१
21

भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः
भविष्यामः लोट् च विध्याद्यर्थेषु धातोर्लोट् आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः भव
तु तुह्योस्तातङाशिष्यन्यतरस्यां आशिषि तुह्योस्तातङ् वा परत्वात्सर्वादेशः भवतात् लो
टो लङ्वत् लोटस्तामादयः सलोपश्च तस्थस्थमिपां तान्तन्तामः ङित इत्त्वं तामादयः
भवतां भवन्तु सेर्ह्यपिच्च लोटः सेर्हिः सोऽपिच्च अतो हेः अतः परस्य हेर्लुक् भव भवतात्
भवतं भवत मेर्निः लोटो मेर्निः स्यात् आडुत्तमस्य पिच्च लोडुत्तमस्याट् स पिच्च भवानि नि
स ७ त्यं ङितः सकारान्तेर्ङिदुत्तमस्य नित्यं लोपः अलोऽन्त्यस्येति सलोपः भवाव भवाम अनद्यत
ने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् लुङ्लङ्लृङ्क्ष्वडुदात्तः पञ्चाङ्गस्याडागमः इतश्च ङितो लस्य
परस्मैपदमिकारान्तस्य लोपः अभवत् अभवतां अभवन् अभवः अभवतं अ
भवत अभवं अभवाव अभवाम विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्व
र्थेषु धातोर्लिङ् यासुट् परस्मैपदेषूदात्तो ङिच्च लिङः परस्मैपदानां यासुडागमो ङिच्च
डु॰ लिङः सलोपोऽनन्त्यस्य सार्वधातुकलिङः अनन्त्यस्य सलोपः सार्वधातुकलिङः अनन्त्यस्य सस्य २१

लोपः इतश्चाश्चे भवतोयेयः भवतः परस्य सार्वधातुकस्य यस्य यासुट् इयस्य इय गुणः लोपो व्योर्व
लि वकारयकारयोर्लोपो वलि भवेत् भवेतां येर्जुस् लिङो झेर्जुस् स्यात् भवेयुः भवेः भवेत
भवेत भवेयं भवेव भवेम लिङाशिषि आशिषि लिङि इतिङ्किदाशिषि धातुसंज्ञः स्यात् किदाशिषि
६ आशिषि लिङ्युपयासौ कित् स्कोरिति सलोपः ङ्किति च किति ङिति निमित्ते इकलक्षणौ गुणवृद्धी
न स्तः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूता
र्थे धातोर्लुङ् स्यात् माङि लुङ् सर्वलकारापवादः स्मोत्तरे लङ् च स्मोत्तरे माङि लङ् स्यात् चात्
लुङ् च्लि लुङि शपोऽपवादः च्लेः सिच् गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु गापाविहेलुक् लुक् १
हेशपि वर्तते भूसुवोस्तिङि भूसुवोः तेनपोः सार्वधातुके गुणो न अभूत् अभूतां (
अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम न माङ्योगे अट् ईडा नस्तः माभवान्
भूत् मास्मभवत् मास्मभूत् लिङ्निमित्ते लृङ् क्रियातिपत्तौ हेतुहेतुमद्भावादि लिङ्निमि
त्तं यत्र तत्र भविष्यत्यर्थे लृङ् क्रियायाश्चानिष्पत्तौ गम्यमानायां अभविष्यत् अभविष्य
तां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम

ल॰
कौ॰
२२

22

अतसातत्यगमने अतति अतधातोः अभ्यासस्यादेरतोदीर्घः स्यात् आत आततुः आतुः आतिथ
आतथुः आत आत आतिव आतिम अतिता अतिष्यति अततु आटद्रादीनां चअटादेरंगस्याद् लङ्लु
ङ्लृङ्क्षु आतत् आतेत् अत्यात् लुङि सिच इडागमे हलि अतिसिचोऽपृक्ते विद्यमानान्सिचो सलस्य प
रस्मादपृक्तस्य हल ईडागमः इट ईटि इटः परस्य सस्य लोपः स्यात् ईटि सिचोपृक्तादेशसिद्धोवक्त
व्यः आतीत् आतिष्टां सिजभ्यस्तविदिभ्यश्च सिचोऽभ्यस्तात् विदश्च परस्य ङित्सम्बन्धिनो झेर्जुस्
आतिषुः आतीः आतिष्टं आतिष्ट आतिषं आतिष्व आतिष्म आतिष्यत् षिधु गत्यां हलंल
घु संयोगे गुरुः संयोगे परे ह्रस्वं दीर्घं च गुरुः स्यात् पुगंतलघूपधस्य च पुगंतस्य लघूपधस्य चां
गस्य गुणः सार्वधातुकार्धधातुकयोः धात्वादेः षः सः सेधति षत्वं सिषेध असंयोगाल्लिट् कित्
असंयोगात्परो लिट् कित् स्यात् सिषिधतुः सिषिधुः सिषेधिथ सिषिधथुः सिषिध सिषेध सि
षिधिव सिषिधिम सेधिता सेधिष्यति सेधतु असेधत् सेधेत् सिध्यात् असेधीत् असेधिष्यत्
एवं शुचशोके गद व्यक्तायां वाचि गदति नेर्गदनदपतपदघुमास्यतिहंतिशाम्यतिचिनोतिदे
ग्धिषु च उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु परेषु प्रणिगदति कुहोश्चुः अभ्यास

यातिवातिद्रा
तिप्सातिवप
वहति

११

स्वकवर्गाद्दकारपोश्च वर्गादेशाः अत उपधायाः उपधायाः अतो वृद्धिः स्यात् ञिति णिति प्रत्यये
जगाद जगदतुः जगदुः जगदिथ जगदथुः जगद णलुत्तमो वा उत्तमो णल्वा णित् जगाद ज
गद जगदिव जगदिम गदिता गदिष्यति गदतु अगदत् गदेत् गद्यात् अतो हलादेर्लघोः ह
लादेर्लघोरतो वृद्धिर्वा इडादौ परस्मैपदे सिचि अगादीत् अगदीत् अगदिष्यत् णद अव्यक्ते श
ब्दे णो नः धात्वादेर्णस्य नः स्यात् नदति णोपदेशास्त्वनर्द्दनाटिनाथनाधृनन्दनक्कनृतः
६५ उपसर्गादसमासेपि णोपदेशस्य उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्या
दसमासेऽसमासेपि प्रणदति ननाद अत एकहल्मध्येऽनादेशादेर्लिटि लिड्निमित्तादेशादि
कं न भवति यदंगं तदवयवस्य संयुक्तहल्मध्यस्थस्यात एत्वमभ्यासलोपश्च किति लिटि ने
दतुः नेदुः थलि च सेटि इट्युतिथलि च पात एत्वं स्यात् नेदिथ नेदथुः नेद ननाद नेदिव ने
दिम नदिता नदिष्यति नदतु अनदत् नदेत् नद्यात् अनादीत् अनदीत् अनदिष्यत् टुनदि स
मृद्धौ आदिर्ञिटुडवः उपदेशे धातोराद्या एते इतः स्युः इदितो नुम् इदितो धातोर्नुम् स्यात्।
नंदति ननंद नंदिता नंदिष्यति नंदतु अनंदत् नंदेत् इदित्वान्नलोपो न नंद्यात् अनंदीत्

ल:
कौ:
२१
२३

आनंदिष्यत् एवं वदिः अभिवादनस्तुत्यौः भदि कल्याणे सुखे च भदिस्यति मोदमदस्वप्नकांतिगति
षु अर्चं पूजायां अर्चति तस्मान्नुड्द्विहलः द्विहलो धातोर्दीर्घीभूतादकारात् परस्य नुडागमः स्यात् आनर्च
आनर्चतुः आनर्चुः अर्चिता अर्चिष्यति अर्चतु आर्चत् अर्चेत् अर्च्यात् आर्चीत् आर्चिष्यत् व्रज
गतौ व्रजति वव्राज व्रजिता व्रजिष्यति व्रजतु अव्रजत् व्रजेत् व्रज्यात् वदव्रजहलंतस्याचः प
षामचो वृद्धिः सिचि परस्मैपदे अव्राजीत् अव्रजिष्यत् कटे वर्षावरणयोः कटति चकाट कटिता
कटिष्यति कटतु अकटत् कटेत् कट्यात् ह्यंतक्षणश्वसजागृणिश्व्येदितां ह्यमांतस्य क्षण
देर्ण्यंतस्य श्वयतेरेदितश्च हलादेर्नेट्यसिचि वृद्धिः अकटीत् अकटिष्यत् गुपू रक्षणे गुपूधूपविच्छि
पणिपनिभ्य आयः स्वार्थे सनाद्यंता धातवः सनादयः क्रमेणोक्ताः प्रत्ययाः अंते येषां ते धातु
का ४ संज्ञाः स्युः सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विप् णिच् यङ् तथा यगाय ईयङ् णिङ् चेति द्वादशामी ।
सनादयः धातुत्वाल्लडादयः गोपायति आयादय आर्धधातुके वा आर्धधातुकविवक्षायां
आयादयो वा स्युः कास्प्रत्ययादाम मंत्रे लिटि आमो मित्वमदंतत्वाद्गुणस्तस्य विदेलक्ष्या ।
आस्का [illegible] सोऽस्य आम्विधानाद्य परस्मैपदं कानेश्च कास्प्रत्ययादाम् विधानान्नस्यनेतत्व अतो लोपः आर्धधातु

कोपदेशोपदेशेनेनस्यानेनोलोपः आर्धधातुके आमः आमः परस्य लेर्लुक सर्वत्र प्रयुज्यते लि
टि आमंत्यादिरपराः कृञ्भूत्येवानुप्रयुज्यन्ते तेषां द्वित्वादि उरत् अभ्यासस्य अत् लोपात् अवेत्ति
लि गोपायांचकार इति द्वित्वात्सर्वत्वाद्यासिद्धत्वे द्वितीयबेनेचि द्वित्व निमित्ते चि अजादेशो न द्वित्वेक
र्तव्ये गोपायांचकारतुः गोपायांचक्रुः एवमेव उपदेशेनान्तात् उपदेशे यो धातुरेकाजनुदा
त्तस्ततः परस्य वलादेरार्धधातुकस्येट् न अनुदात्तेषु निरुद्दत्तु स्वीलुप्तवृद्धिशीभ्रिभिः इह
निट् हुम्भांचवित्रैकाचोजनेषु हिताःस्त्वनाः कान्तेषु शक्लृ चान्तेषु पच् मुच् रिच् वच् विच् कः ६
सिचः षट् छान्तेषु प्रच्छ एकः जान्तेषु त्यज् निजिर् भज् भञ्ज् भ्रस्ज् मस्जि यज् युज् रुज् रंज् छुपतप
विजिर् स्वंजि संज् सृजः चतुर्दश दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद् भिद् विद् स्कं तिपतृप
द् हद् शद् स्विद् त्रयोदश धान्तेषु क्रुध् क्षुध् बुध् बंधि युधि रुध् राध् व्यध् शुध् साध्। यलिप ५०
सिधः एकादश नान्तेषु मन् हन् द्वौ पान्तेषु आप् क्षिप् लुप् वप् शप् स्वप् सृप् त्रयोदश
म मान्तेषु गम् नम् यम् रम् चत्वारः भान्तेषु यभ् रभ् लभ् त्रयः शान्तेषु क्रुश् दंश् दिश् दृश्
मृश् रिश् रुश् लिश् विश् स्पृशः एकादश षान्तेषु त्विष् तुष् द्विष् दुष् पुष् पिष् विष् शिष्

ल॰ कौ॰ २४ शुष् हृष् श्लिषः एकादश षान्तेषु वसघसौ सान्तौ हान्तेषु दह् दिह् दुह् नह् मिह् रुह् लिह् वह्
अष्टौ अनुदात्ताः हलन्तेषु धातवस्त्र्यधिकं शतं गोपायांचकर्थ गोपायांचक्रथुः गोपायांचक्र
गोपायांचक्र गोपायांचकार गोपायांचकर गोपायांचकृव गोपायांचकृम गोपायामास
गोपायांबभूव पक्षे जुगोप जुगुपतुः जुगुपुः स्वरतिसूतिसूयतिधूञूदितो वा स्वरत्यादेरूदितश्च परस्य
वलादेरार्धधातुकस्येड्वा जुगोपिथ जुगोप्थ गोपायिता गोपिता गोप्ता गोपायि
ष्यति गोपिष्यति गोप्स्यति गोपायतु अगोपायत् गोपायेत् गोपाय्यात् गुप्यात् अगोपा
यीत् अगोपीत् नेटि हलादेर्लघोः अगोपीत् झलो झलि झलः परस्य सस्य लोपो झलि अ
गौप्तां अगौप्सुः अगौप्सीः अगौप्तं अगौप्त अगौप्सं अगौप्स्व अगौप्स्म अगोपायिष्यत्
अगोपिष्यत् अगोप्स्यत् क्षि क्षये क्षयति चिक्षाय चिक्षियतुः चिक्षियुः एकाच इति नि
षेधे प्राप्ते कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि क्रादिभ्य एव लिटि इट् न स्यात् अन्यस्मादनिटोऽप्यस्या
न्य त् अचस्तास्वत्थल्यनिटो नित्यम् उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इड्
न उपदेशेऽत्वतः उपदेशेऽकारवतः तासौ नित्यानिटः ऋदन्तादेव थलो नेट् भारद्वाजस्य म २४
परस्य थलो नेट् ऋतो भारद्वाजस्य

ते नाम्यस्य विवयिथ विवेथ विवियथुः विविय विवाय विवय विवियिव विवियिम वे
ता वेष्यति वयतु अवयत् वयेत् अकृत्सार्वधातुकयोर्दीर्घः अजंतानामस्य दीर्घो या
दौ प्रत्यये न तु कृत्सार्वधातुकयोः वीयात् सिचि वृद्धिः परस्मैपदेषु इगंतानामस्य वृद्धिः परस्मैप
दे सिचि अवैषीत् अवेष्यत् नय संनाये नयति निनाय निन्यतुः निन्युः निनयिथ निनेथ नेता।
नेष्यति नयतु अनयत् नयेत् नीयात् अनैषीत् अनेष्यत् २ क्रमु पादविक्षेपे।
लो मु वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः श्यन्वा [illegible] वा नेरि सार्वधातुके परे श्यः क्रमः
परस्मैपदेषु क्रमो दीर्घः परस्मैपदेष्विति क्राम्यति क्रामति चक्राम क्रमिता क्रमिष्यति क्रा
म्यतु क्रामतु अक्राम्यत् अक्रामत् क्राम्येत् क्रामेत् क्रम्यात् अक्रमीत् अक्रमिष्यत् पा पाने
पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशी
यसीदाः पादीनां पिबादयः स्युः इत्संज्ञकशकारादौ प्रत्यये परे पिबादेशोदंतत्वेन गुणो न पिब
ति आतऔणलः २ आदंतात् णलऔ स्यात् पपौ आतोलोपइटि च अजाद्यार्धधातुक
योः क्ङिति परयोरातोलोपः पपतुः पपुः पपिथ पपाथ पपथुः पप पपौ पपिव पपिम

गापिबतिजहातिस्यतीनामेवएत्वमाङ्धातुकेलिङिकितिपरे

लं:
कौ:
२५

पाता पास्यति । पिबतु अपिबत् पिबेत् । दाधाघ्वदाप् दाप्दैपवर्जिता दाधा धातवो घुसंज्ञाः स्युः दाप् दै

पोर्विना एलिङि ॥ घुसंज्ञानां मास्थागापाजहातिसां एत्वं स्यात् आर्धधातुके किति लिङि परे पेयात् ।

२५ गातिस्थेति सिचो लुक् अपात् अपातां आतः सिज्लुकि आदन्तादेवझेर्जुस् उस्यपदान्तात्

पर अपदान्तादकारात् उसि परे पूर्वपरयोः पररूपमेकादेशः अपुः अपास्यत् ग्लैम्लै हर्षक्षये ग्लायति आदेच उप

देशेऽशिति उपदेशे एजन्तस्य धातोरात्वं स्यात् नतु शिति जग्लौ ग्लाता ग्लास्यति ग्लायतु अग्लायत्

६ ग्लायेत् वान्यस्य संयोगादेः घुमास्थादेरन्यस्य संयोगादेरात एत्वं वा स्यात् आर्धधातुके किति लिङि ग्ला

यात् ग्लेयात् यमरमनमातां सक्च एषां सक् स्यात् एभ्यः सिच इट् स्यात् परस्मैपदेषु अग्लासीत् अ

ग्लास्यत् हृ कौटिल्ये ह्वरति ऋतश्च संयोगादेर्गुणः ऋदन्तस्य संयोगादेरङ्गस्य गुणो लिटि उप

धायां वृद्धिः जह्वार जह्वरतुः जह्वरुः जह्वर्थ जह्वरथुः जह्वर जह्वार जह्वर जह्वरिव जह्वरि

म ह्वर्ता ऋद्धनोः स्ये ऋतो हन्तेश्च स्यस्य इट् स्यात् ह्वरिष्यति ह्वरतु अह्वरत् ह्वरेत् गुणोऽर्तिसं

योगाद्योः अर्तेः संयोगादेः ऋदन्तस्य च गुणः यक्यादावार्धधातुके लिङि च ह्वर्यात् अह्वार्षी

त् अह्वरिष्यत् श्रु श्रवणे श्रुवः शृ च श्रुवः शृ आदेशः श्नु प्रत्ययश्च कर्तरि सार्वधातुके सार्वधातुकेऽपिति

[illegible] अवर्णान्तस्य णत्वं वाच्यं २५

सार्वधातुकमपित् अपित्सार्वधातुकं ङिद्वत्स्यात् ङित्वाद्गुणो न स्तृणुतः हुश्नुवोः सार्वधातुके
जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्यासंयोगपूर्वोवर्णस्य यण् स्यात् अजादौ सार्वधातुके स्तृण्वन्ति
स्तृणोषि स्तृणुथः स्तृणुथ स्तृणोमि लोपश्चास्यान्यतरस्यां म्वोः असंयोगपूर्वस्य प्रत्ययोकारस्य
[illegible] लोपो वा म्वोः परयोः स्तृण्वः स्तृणुवः स्तृण्मः स्तृणुमः तस्तार तस्तरतुः तस्तरुः तस्तर्थ तस्तरथुः
तस्तर तस्तार तस्तर तस्तृव तस्तृम स्तर्ता स्तरिष्यति स्तृणोतु स्तृणुतात् स्तृणुतां स्तृण्वन्तु
उतश्च प्रत्ययादसंयोगपूर्वात् असंयोगपूर्वात्प्रत्ययोकारान्ताद्धेर्लुक् स्तृणु स्तृणुतात् स्तृणुतं
स्तृणुत स्तृणवानि स्तृणवाव स्तृणवाम अस्तृणोत् अस्तृणुव अस्तृणुम अस्तृणुम स्तृणुयात् स्तृणु-
यातां उस्यपदान्तात् २ स्तृणुयुः स्तृणुयाः स्तृणुयातं स्तृणुयात स्तृणुयां स्तृणुयाव स्तृणुयाम
स्तृयात् स्तृयास्तां स्तृयासुः अस्तारीत् अस्तरिष्यत् । गम्लृ गतौ इषुगमियमां छः एषां छः स्यात्
शिति गच्छति जगाम गमहनजनखनघसां लोपः क्ङित्यनङि एषामुपधाया लोपो जादौ
क्ङित्यनङि जग्मतुः जग्मुः जगमिथ जगन्थ जग्मथुः जग्म जगाम जगम जग्मिव जग्मिम
गंता गमेरिट् परस्मैपदेषु गमिष्यति गच्छतु अगच्छत् गच्छेत् गम्यात् पुषादिद्युताद्यॢ-

आतो ङितः ईतः परस्य ङितामाकारस्य इः एधेते

ल॰ कौ॰ २९ 26

दितः परस्मैपदेषु इत्येव स्यात् अगमन् अगमिष्यत् २ इति परस्मैपदप्रक्रिया एध वृद्धौ टित
आत्मनेपदानां टेरे टितो लस्यात्मनेपदानां टेरेत्वं स्यात् एधते एधेते एधन्ते थासः से टितो लस्य थासः से
स्यात् [illegible] एधसे एधेथे एधध्वे अतो गुणे एधे एधावहे एधामहे इजादेश्च गुरुमतो
ऽनृच्छः इजादिर्यो धातुर्गुरुमान् ऋच्छत्यन्यस्तत आम् स्याल्लिटि आम्प्रत्ययवत्कृञोऽनुप्र
योगस्य आम्प्रत्ययस्येव प्रकृतिवदनुप्रयुज्यमानात् कृञोऽप्यात्मनेपदं स्यात् लिटस्तझयोरेशिरेच् ५ यो
लिङादेशयोस्तझयोः एश् इरेच् एतौ स्तः एधांचक्रे एधांचक्राते एधांचक्रिरे एधांचकृषे एधांचक्रा
थे इणः षीध्वंलुङ्लिटां धोऽङ्गात् इणन्तादङ्गात्परेषां षीध्वं लुङ् लिटां धस्य ढः एधांचकृढ्वे एधां
चक्रे एधांचकृवहे एधांचकृमहे एधामास एधांबभूव एधिता एधितारौ एधितारः एधितासे
एधितासाथे धि च धादौ प्रत्यये सस्य लोपः एधिताध्वे ह एति तासस्त्योः सस्य हः स्यादेति एधिता
हे एधितास्वहे एधितास्महे एधिष्यते एधिष्येते एधिष्यन्ते एधिष्यसे एधिष्येथे एधिष्यध्वे
एधिष्ये एधिष्यावहे एधिष्यामहे आमेतः लोट एत आम् एधताम् एधेताम् एधन्ताम् सवाभ्यां वा
मौ सवाभ्यां परस्य लोट एतः क्रमाद्वामौ स्तः एधस्व एधेथाम् एधध्वं एत ऐ लोडुत्तमस्य एतस्ये ॥ २९

एधै एधावहै एधामहै एधेत एधेतां एधेरन् एधेथाः एधेयाथां एधेध्वं एधेय एधेवहि एधेमहि
लिङः सीयुट् लिङ आत्मनेपदानां सीयुट् सलोपः एधेत एधेयातां झस्य रन् लिङो झस्य रन् एधे
रन् एधेथाः एधेयाथां एधेध्वं इटो ऽत् लिङादेशस्येटो ऽत् एधेय एधेवहि एधेमहि सुट् तिथोः लि
ङः सलोपो ऽसुट् एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं एधि
षीय एधिषीवहि एधिषीमहि एधिष्ट एधिषातां आत्मनेपदेष्वनतः ७ अनकारान्तस्या
त्मनेपदस्य झस्यात् एधिषत एधिष्ठाः एधिषाथां एधिढ्वं एधिषि एधिष्वहि एधिष्म
हि एधिष्यत एधिष्येतां एधिष्यंत एधिष्यथाः एधिष्येथां एधिष्यध्वं एधिष्ये एधिष्यावहि ए
धिष्यामहि कमु कान्तौ कमेर्णिङ् णिङ् स्वार्थे कामयते कामयेते कामयंते कामयसे
कामयेथे कामयध्वे कामये कामयावहे कामयामहे अयामन्ताल्वाय्येत्न्विष्णुषु आम् अंत आ
लु आय्य इत्नु इष्णु एषु परेषु णेरयादेशः कामयांचक्रे आयादय आर्धधातुके वा चकमे चकमाते चक
मिरे चकमिषे चकमाथे चकमिध्वे चकमे चकमिवहे चकमिमहे कामयिता कमिता (
कामयिष्यते कमिष्यते कामयतां अकामयत कामयेत कामयिषीष्ट कमिषीष्ट णिश्रि

ल॰ कौ॰ ९२

मुरुत्वः कर्तरि चङ् एवं तात् श्विश्रिद्रुस्रुभ्यः श्लेः चङ् कर्तरि लुङि कारि अत इति स्थिते णेरनिटि अ
निटि आर्धधातुके णेर्लोपः णौ चङ्युपधाया ह्रस्वः चङि अनभ्या
सधात्वर्थस्य प्रथमस्यैकाचो द्वे स्तः चङि अजादेस्तु द्वितीयस्य सन्वल्लघुनि चङ्परेऽनग्लोपे च
ङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्य सन्नीव कार्यं स्यात् अनग्लोपे सति सन्यतः अ
भ्यासस्यात इत्स्यात् दीर्घो लघोः लघोरभ्यासस्य दीर्घः सन्वद्भावविषये अचीकमत शिङ्णा
वेवमेः ऋतेरीयङ् आयादयः अचकमत अकामयिष्यत अकमिष्यत अयगतौ अयते उपसर्गस्या
यतौ उपसर्गस्य रेफस्य लत्वं स्यात् अयतौ पलायते दयायासश्च अयाञ्चक्रे लिटि अयांचक्रे ।
अयिता अयिष्यते अयतां अयत अयेत अयिषीष्ट विभाषेटः इणः परेषां षी
ध्वं लुङ्लिटां धस्य वा ढः अयिषीढ्वं अयिषीध्वं आयिष्ट आयिष्यत द्युत दीप्तौ द्योतते द्युति
स्वाप्योः संप्रसारणं अभ्यासस्य दिद्युते द्योतिता द्योतिष्यते द्योततां अद्योतत द्योतेत द्योति
षीष्ट द्युद्भ्यो लुङि द्युतादिभ्यः परस्मैपदं वा लुङि पुषादीत्यङ् अद्युतत् अद्योतिष्ट अद्योति
ष्यत एवं श्विता वर्णे ञिमिदा स्नेहने ञिष्विदा स्नेहनमोचनयोः मोहनयोरित्येके ञिक्ष्विदा ९२

प्रीतौ १ त्यागे १ अत्तानम १
धात्वादर्षः १

ऋदुपधेभ्यो लिटः कित्वं गुणात् पूर्वविप्रतिषेधेन ३
इत्ततिनोऽम मत्राम्र १ प्रत्ययविपर्ययः १

ष्वेके तवर्गीयान्तं मिथीनोच घुट परिवर्तने शुभ दीप्तौ क्षुभ संचलने णभ तुभ हिंसायां स्रंसु ध्वं-
सु भ्रंसु अवस्रंसने ध्वंसु गतौ स्रंभु विश्वासे वृतु वर्तने वर्तते ववृते वर्तिता वृद्भ्यः स्यसनोः वृद्-
भ्यः पंचभ्यो वा परस्मैपदं स्यसनि न सङः चतुर्भ्यः वृत वृध शृध स्यन्दू भ्यः सकारादेरा-
र्धधातुकस्य इट् न तङानयोरभावे वर्त्स्यति वर्तिष्यते वर्तितां अवर्तत वर्तेत वर्तिषीष्ट अ-
वृतत् अवर्तिष्ट अवर्तिष्यत । ददवाने ददते न शसददवादिगुणानां शसेर्ददेर्वकारादीनां
न६ गुणशब्देन विहितो योऽकारस्तस्य च एत्वाभ्यासलोपौ न ददे दददाते दददिरे ददिषीष्ट अ-
ददिष्ट अददिष्यत ॥ त्रपूष् लज्जायां त्रपते तृफलभजत्रपश्च एषामेत्वमभ्यासलोपश्च कि-
ति लिटि सेटि थलि च त्रेपे त्रपिता त्रप्ता त्रपिष्यते त्रप्स्यते त्रपतां अत्रपत त्रपेत त्रपिषीष्ट
त्रप्सीष्ट अत्रपिष्ट अत्रप्त अत्रपिष्यत अत्रप्स्यत इत्यात्मनेपदिनः श्रिञ् सेवायां श्रयति । पु४
श्रयते शिश्राय शिश्रिये श्रयितासि श्रयितासे श्रयिष्यसि श्रयिष्यते श्रयतु श्रयतां अश्रयत्
अश्रयत श्रयेत् श्रयेत श्रीयात् श्रयिषीष्ट अशिश्रियत् अशिश्रियत अश्रयिष्यत् अश्रयिष्य-
त भृञ् भरणे भरति भरते बभार बभ्रतुः बभ्रुः बभर्थ बभृव बभृम बभ्रे बभृषे भर्तासि भ

ल॰ कौ॰ २८

नोसि भरिष्यति भरिष्यते भरतु भरतां अभरत् अभरत भरेत् भरेत रिङ्शयग्लिङ्क्षु इति रिङ् आदेशः क्रियादाशा ड्.
र्धधातुके लिङि च ऋतो रिङ् स्यात् रीङि प्राप्ते रिङ्विधिसामर्थ्यात् दीर्घो न भ्रियात् उश्च ऋवर्णान्तात् परौ झलादी तात्
लिङ्सिचौ कितौ स्तः तङि भृषीष्ट भृषीयास्तां अभार्षीत् ह्रस्वादङ्गात् ह्रस्वान्ताद् अङ्गात्परस्य सिचो लोपः झ
लि अभृत अभरिष्यत् अभरिष्यत हृञ् हरणे हरति हरते जहार जहर्थ जह्रिव जह्रिम जह्रे ज
ह्रिषे हर्ता २ हरिष्यति अहरिष्यत् धृञ् धारणे धरति धरते णीञ् प्रापणे नयति नयते निनाय
डुपचष् पाके पचति पचते पपाच पेचिथ पपक्थ पेचे पक्ता भज सेवायां भजति बभाज भेजे भ
क्ता भक्ष्यति भजतु भजतां अभाक्षीत् अभक्त अभक्षातां यज देवपूजासंगतिकरण
दानेषु यजति यजते लिट्यभ्यासस्योभयेषां वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्यात् लिटि
इयाज वचिस्वपियजादीनां किति वचिस्वपियजादीनां च संप्रसारणं किति ईजतुः ईजुः इयजि
थ इयष्ठ ईजे यष्टा यक्ष्यति यक्ष्यते इज्यात् यक्षीष्ट अयाक्षीत् अयष्ट वह प्रापणे व
हति वहते उवाह ऊहतुः ऊहुः उवहिथ झषस्तथोर्धोऽधः ष्टुना ष्टुः ढो ढे लोपः ढो
ढे लोपः ढलोपे पूर्वस्य दीर्घोऽणः सहिवहोरोदवर्णस्य ढलोपे उवोढ ऊहे वोढा वक्ष्यति वक्ष्यते अ २८

चोः कुः वद्गस्य ... यदे भवा ... अपदांते

... त्यादीनां ...

... सोढ: हस्वढःस्या ... लिवदा ...

वादीत् अवेदिषं अवादिषुः अवेदिष्ठ अवदिष्टां अवेदिष्ठाः अवेदिढ्वं अवदिषि अवदिष्महि वेञ् त
न्तुसंताने वयति वयते वेञोवयिः वेञोवयिर्वा स्यात् लिटि इकारउकारयोर्यः उवाय ग्रहि
ज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च यथाकिङिति संप्रसारणं स्यात् ति२
[illegible] ऊयतुः ऊयुः उवयिथ वयादेशाभावे वेञः न संप्रसारणं लिटि ववौ ववतुः ववुः ववि
थ ववाथ ववे वाता वयात् वासीष्ट अवासीत् अवासिष्टां अवास्यत् इति भ्वादयः ऋतेरीय सि अरनुओ
ङ् अस्मात् स्वार्थे ईयङ् ऋतीयते ऋतीयांचक्रे आयादय आर्धधातुके वेति पक्षे आनर्तेऽ उपायास्
र्तिष्यति आर्तीत् अदभक्षणे अदिप्रभृतिभ्यः शपः लुक् स्यात् अत्ति लिट्यन्यतरस्यां अदेर्
घस्लृवा स्याल्लिटि जघास गमहनेत्युपधालोपः शासिवसिघसीनां च षत्वं
स्यात् जक्षतुः जक्षुः जघसिथ आद आदतुः इडत्त्यर्तिव्ययतीनां यथाप्राप्ते नित्यमिट्
ल्प्यो १० आदिथ अत्ता अत्स्यति हुझल्भ्यो हेर्धिः होझलंतेभ्यश्च हेर्धिः स्यात् अद्धि अदानि अदः स
र्वेषां अदः परस्यापृक्तस्य सार्वधातुकस्याडागमः स्यात् सर्वेषां मतेन आदत् आत्तां आद्या
त् लुङ्सनोर्घस्लृ अदेर्घस्लृः स्यात् लुङि सनि च लृदित्वादङ् अघसत् हनहिंसागत्योः हं

ल॰ कौ॰
२९

ति अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति अनुनासिकान्ताना
मेषां वनतेः तनोत्यादेश्च लोपः स्यात् झलादौ क्ङिति यमिरमिनमिगमिहनिमन्यतयोऽनुदा
त्तोपदेशाः तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु तनोत्यादयः हतः घ्नन्ति वमो वा उपसर्ग
स्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा प्रहण्मि प्रहन्मि प्रहण्वः प्रहन्वः जघान जघ्नतुः जघ्नुः
अभ्यासाच्च अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् जघनिथ जघन्थ जघ्नथुः जघ्न जघान ज
घन जघ्निव जघ्निम हन्ता हनिष्यति हन्तु हतात् हतां घ्नन्तु हन्तेर्जः हौ परे असिद्धवदत्राभात्
इत ऊर्ध्वमापादसमाप्तेराभीयं समानाश्रये तस्मिन्कर्तव्ये तदसिद्धमिति जस्यासिद्धत्वान्न
हेर्लुक् जहि हनानि हनाव हनाम अहन् अहतां अघ्नन् अहन् अहतं अहत
अहनं अहन्व अहन्म हन्यात् आर्धधातुके हनो वध लिङि लुङि च
वधादेशोऽदन्तः वध्यात् वध्यास्तां वध्यासुः अवधीत् अवधिष्टां अवधिषुः अहनिष्यत् यु मि
श्रणामिश्रणयोः उतो वृद्धिर्लुकि हलि लुग्विषये उतो वृद्धिः पिति हलादौ सार्वधातुके
न त्वभ्यस्तस्य यौति युतः युवन्ति युयाव युयुवतुः युयुविथ युयुविव युयुविम यविता य

विष्यति यौतु युतात् अयौत् अयुतां अयुवन् युयात् युयुतां युयुः यूयात् यूयास्तां यूयासुः
अयावीत् अयविष्यत् या प्रापणे याति यातः यांति ययौ ययतुः ययुः ययिथ ययाथ याता ५२
यास्यति यातु यातात् अयात् अयातां २ लङः शाकटायनस्यैव इर्दंश्नात्परस्मलङो वा अदुस्
अयान वा अयान् अयुः यायात् यायातां यायुः यायात् यायास्तां यायासुः अयासीत् अयासिष्टां अ
यासिषुः अयासीः अयासिष्टं अयासिष्ट अयासिषं अयासिष्व अयासिष्म एवं वातादिवंधन
ये भासीभ्रासीभे प्सापाके डाङ्क्लायांगतौ प्साभक्षणे पारक्षणे रादाने लाआदाने ख्या
क प्रकथने अयं सार्वधातुकमात्रविषयः विद ज्ञाने विदो लटो वा वेत्तेर्लटः परस्मैपदानां णलादयो
वा वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म पक्षे वेत्ति वित्तः विदंति उषविदजा
गृभ्योन्यतरस्यां पक्षे लिट्याम्वा विदेरदंतत्वप्रतिज्ञानात् गुणः विदांचकार विदांबभूव। वि ४
विदामास विवेद वेदिता वेदिष्यति विदांकुर्वंत्वित्यन्यतरस्यां वेत्तेर्लोटि गुणाभावो लोटो
क् लोडंतकरोतेश्च प्रयोगास्त्वचानि निपात्यते पुरुषवचनेनर्नौ विवक्षिते तनादिकृञ्भ्य उः प्राप्तो ६ ११
पवादः विदांकरोतु अत उत्सार्वधातुके उप्रत्ययांतस्य कृञोकारस्य उत्स्यात् सार्वधातुके

ल॰
कौ॰
१॰

क्ङिति विदांकुरुतां उतश्च हेर्लुक् विदांकुरु विदांकरवाणि विदांकरवाव विदांकरवाम।
वेद वेत्तु विदात् विद्धां विदंतु विद्धि विद्ध वित्त वेदानि वेदाव वेदाम अवेत् अविदाम्
सिजभ्यस्तविदिभ्यश्च उस् अविदुः दश्च धातोर्दस्य पदांतस्य सिपि रुर्वा अवेः अवेत् वि
द्यात् विद्यास्तां अवेदीत् अवेदिष्यत् अस भुवि अस्ति श्नसोरल्लोपः श्नस्यास्तेश्चाकारस्य
लोपः स्यात्सार्वधातुके क्ङिति स्तः संति तासस्त्योर्लोपः सि परे सलोपः असि स्थः स्थ अस्मि स्वः।
स्मः आर्धधातुके इत्यधिकृत्य अस्तेर्भूः बभूव भविता अस्तु स्तात् संतु घ्वसोरेद्धावभ्या
सलोपश्च आभीयत्वात् दीर्घः एधि स्तात् स्तं स्त असानि असाव असाम आसीत् आ
स्तां आसन् स्यात् उपसर्गप्रादुर्भ्यामस्तिर्यच्परः उपसर्गेण प्रादुश्च परस्यास्तेः सस्य षः स्या
त् यकारे चि च परे निष्यात् प्रादुःष्यात् अभूयात् अभवत् इण गतौ एति इतः ५ इणो यण्
अजादौ प्रत्यये परे यंति अभ्यासस्यासवर्णे इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णे चि इयाय
दीर्घ इणः किति लिटि ईयतुः ईयुः इययिथ इयेथ एतु एतां आयन् इयात् ईयात् ९ ए
ते लिङि उपसर्गात्परस्य इणो ह्रस्वः स्यात् आर्धधातुके किति लिङि निरियात् इणो गा लुङि १°

31

रुद स्वप श्वस अन जक्ष्भ्यः हलादेः पितः सार्वधातुकस्य ईट् स्यात् ४३

गातिस्थातिलुक् अगात् अगातां अगुः मृजूष् शुद्धौ मृजेर्वृद्धिः मृजेरिकोवृद्धिः धातुप्रत्यये
परे ङ्कित्यजादौ वेष्यते अन्यत्र निषेधः मार्ष्टि मार्जन्ति ममार्ज ममार्जतुः ममृजतुः ममार्जिथ ममार्ष्ठ मृजन्ति
मार्जिता मार्ष्टा मार्जिष्यति मार्ष्टु अमार्ट् अमार्जीत् अमार्क्षीत् रुदिर् अश्रुविमोचने २ रुदादिभ्यः
सार्वधातुके रुदस्वपश्वसन् अन जक्ष पञ्चभ्यो वलादेः सार्वधातुकस्येट् स्यात् रोदिति रुदितः रुदन्ति ४ स
अड्गार्ग्यगालवयोः अरोदीत् अरोदत् [illegible] अरुदितां अरुदन् अरोदीः अरोदः रुद्यात् ईरे
तोवा इरितोधातोः अङ्वा परस्मैपदेषु अरुदत् अरोदीत् २ जागृ निद्राक्षये जागर्त्ति जागृतः
अदभ्यस्तात् झस्यात्स्यात् अंतोपवादोऽयमिति जागरांचकार जजागार जागृ विचिण्णल्ङित्सु ।
जागर्त्तेर्गुणः स्यात् विचिण्णल्ङित्सु अन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च जजागरतुः अजागः
अजागः अजागृतां जुसि च अजादौ जुसीगन्तानां गुणः स्यात् अजागरुः आशिषि जागर्यात्
अजागरीत् दरिद्रा दुर्गतौ २ दरिद्राति इद्दरिद्रस्य दरिद्रातेरिकारः स्यात् वलादौ ङ्किति सार्वधातुके
दरिद्रितः नाभ्यस्तयोरातः अनयोरातो लोपः स्यात् ङ्किति सार्वधातुके दरिद्रति अनेकाच्त्वात् आम् च ११
दरिद्रांचकार आतऔणलिदरिद्रौ ददरिद्रौ दरिद्रातेरार्धधातुके विवक्षिते आतो लोपो वाच्यः लुङि

लं॰ कौ॰ व्या॰

वासनिष्वुल्लिस्वुरिनच दरिद्रिता अदरिद्रात् अदरिद्रिताम् अदरिद्रुः दरिद्रियात् दरिद्र्यात् अदरिद्रीत् ३
इसकौ अदरिद्रासीत् ॥ शासु अनुशिष्टौ शास्ति शास इदङ्हलोः २ शास उपधाया इत्स्यात् अङि हलादौ क्ङि-
ति च शासिवसीतिषः शिष्टः शासति शशास शासिता शास्तु शा हौ शास्तेः शादेशः स्याद्धौ परे आभीयत्वेना-
सिद्धत्वात् हेर्धिः शाधि तिप्यनस्तेः पदान्तस्य सस्य दः स्यात् तिपि न त्वस्तेः अशात् शिष्यात् सर्तिशा-
स्त्यर्तिभ्यश्च सर्तेः शास्तेरर्तेश्च लुङि अशिषत् इति परस्मैपदिनः ॥ शीङ् स्वप्ने शीङः
सार्वधातुके गुणः क्ङिति चेत्यस्यापवादः शेते शयाते शीङो रुट् शीङः परस्य झादेशस्यातो रुडागमः
स्यात् शेरते शेषे शयाथे शेध्वे शये शेवहे शेमहे शिश्ये शिश्याते शिश्यिरे शयिता शयिष्यते
शेतां शेरतां शयीरन् शयिषीष्ट शयिषीयास्तां अशयिष्ट अशयिष्यत ॥ इङ् अध्ययने इङिकौ
अध्युपसर्गतो न व्यभिचरतः अधीते अधीयाते अधीयते गाङ् लिटि इङो गाङ् लिटि अधिजगे अध्ये-
ता अध्येष्यते अध्ययै अध्ययावहै अध्ययामहै अध्यैत अध्यैयातां अध्यैयत अध्यैथाः अध्यैया-
थां अध्यैध्वं अध्यैयि अध्यैवहि अध्यैमहि अधीयीत अधीयीयातां अधीयीरन् अध्येषीष्ट । विभाषा
लुङ्लृङोः इङो गाङ् वा स्यात् गाङ्कुटादिभ्योऽञ्णिन्ङित् गाङादेशात् कुटादिभ्यश्च ञिण्णित् भिन्नः प्रत्ययः ङित्.

३(

नःस्युः घुमास्थागापाजहातिसां हलि एषामात ईत्स्यात् हलादौ क्ङिति आर्धधातुके अध्यगी
ष्ट अध्यैष्ट अध्यगीष्यत अध्यैष्यत इत्यात्मनेपदिनः दुह प्रपूरणे दोग्धि दुग्धः दुहंति धोक्षि
दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे दुदोह दुदुहे दोग्धा धोक्ष्यति धोक्ष्यते
दोग्धु दुग्धात् दुग्धात् दुग्धां दुहंतु दुग्धि दुग्धात् दुग्धं दुग्ध दोहानि दुग्धां दुहाताम्
धुक्ष्व दुहाथां धुग्ध्वं दोहै दोहावहै दोहामहै अधोक् अधोग् अदुग्धां अदुहन् अदुग्ध
अदुहातां अदुहत दुह्यात् दुहीत ॥ लिङ्सिचावात्मनेपदेषु ॥ इकः समीपाद्धलः परौ
झलादी लिङ्सिचौ कितौ स्तस्तङि । दुह्यात् दुह्यास्तां दुहीष्ट धुक्षीष्ट शल इगुपधादनि
टः क्सः इगुपधो यः शलन्तः तस्मादनिटः च्लेः क्सः अधुक्षत् लुग्वा दुहदिहलिहगुहामात्म
नेपदे दंत्ये २ एषां क्सस्य लुग्वा दंत्ये तङि अदुग्ध अधुक्षत क्सस्याचि अजादौ तङि क्सस्य अ ३ कृ हि ३
लोपः अधुक्षातां अधुक्षंत अधुक्षथाः अदुग्धाः अधुक्षाथां अधुक्षध्वं अधुग्ध्वं अधुक्षावहि ढलोपे पूर्वस्य दीर्घोऽणः
अदुह्वहि अधुक्षामहि अधोक्ष्यत् अधोक्ष्यत २ दिह उपचये लिह आस्वादने लेढि लीढः लिहंति ले
क्षि लेह्मि लिह्वः लिह्मः लीढे लिहाते लिहते लिहाथे लीढ्वे लिलेह लिलिहे लेढा ले

ल॰
कौ॰
२२

क्ष्यति लेक्ष्यते लीढु लीढात् लीढां लिहंतु लीढि लिहानि लेहाव लेहाम लीढां लिहाताम्
लिहतां अलेट् अलीढां अलिहन् अलीढ अलिहातां अलिहत लिह्यात् लिहीत लिहीयातां
लिहीरन् लिक्षात् लिक्षीष्ट अलिक्षत् अलिक्षतां अलीढ अलिक्षत अलिक्षातां अलिक्षंत
अलेक्ष्यत् अलेक्ष्यत ॥ ब्रूञ् व्यक्तायां वाचि ब्रुवः पंचानामादित आहो ब्रुवः ब्रुवो लटस्तिबादीनां
णलादयः पंच वा स्युर्ब्रुवश्चाहादेशः आह आहतुः आहुः आहस्थः आत्थ आहथुः
ब्रुव ईट् ब्रुवो हलादेः पित ईट् ब्रवीति ब्रूतः ब्रुवंति ब्रूते ब्रुवाते ब्रुवते ब्रुवो वचिः आर्धधातुके
परे उवाच ऊचतुः ऊचुः उवचिथ उवक्थ ऊचे वक्ता वक्ष्यति वक्ष्यते ब्रवीतु ब्रूतात् ब्रूतां
ब्रुवंतु ब्रवाणि ब्रूतां ब्रुवै अब्रवीत् अब्रूत ब्रूयात् उच्यात् वक्षीष्ट ॥ अस्यतिवक्तिख्याति
भ्योऽङ् एभ्यःच्लेरङ् वच उम् अङि अवोचत् अवोचत अवक्ष्यत् ॥ ऊर्णुञ् आच्छादने ऊर्णोते
विभाषा वृद्धिर्वा हलादौ पिति सार्वधातुके ऊर्णौति ऊर्णोति ऊर्णुतः ऊर्णुवंति ऊर्णुते
ऊर्णुवाते ऊर्णुवते ऊर्णोतेराम्नेति वाच्यं नंद्राः संयोगादयः अच्परात् संयोगादयो नदरा द्वि
र्न भवंति नुशब्दस्य द्वित्वं ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः विभाषोर्णोः इडादिप्रत्ययो ङित्

वचिरीतेव वक्ति
तमिति यङ्गंतं तद्
दादौ वो ध्वम्

२२

त्स्माद्वा दीधीविथ दीधीविव दीधीविता दीधीविता दीधीतान् दीधीवासि दीधीषे गुणो एके

दीधीते: गुणो एकहलादौ पिति सार्वधातुके दीधीत दीधीयात् दीधीयास्तां दीधीषीष्ट दीधी

षीयास्तां दीधीषीरन् दीधीषीष्ट दीधीतेर्विभाषा इडादौ सिचि परस्मैपदे वृद्धिर्वा पक्षे गुणः

अदीधीवीत् अदीधीविष्टां अदीधीवीत् अदीधीविष्टां अदीधीविष्ट अदीधीविषातां अदीधीविषत अदीधीविष्ठाः

अदीधीविष्ठाः अदीधीविषाथां अदीधीविध्वं अदीधीविषि अदीधीविष्वहि अदीधीविष्महि अदीधीविष्यत्

अदीधीविष्यत् अदीधीविष्यत इत्यदादि ॥ हु दानादानयोः जुहोत्यादिभ्यः शपः श्लुः श्लौ।

धातोर्द्वित्वम् जुहोति जुहुतः अभ्यस्तात् झस्य हुश्नुवोः इति यणि जुह्वति भीह्रीभृहुवां श्लुव

च्च प्रत्यये लिट्याम्वा स्यात् आमि श्लाविव कार्यं स्यात् जुहवाञ्चकार जुहाव जुहुवतुः जुहविथ (जुहोथ

होता होष्यति जुहोतु जुहुतात् जुहुतां जुह्वतु जुहुधि जुहवानि अजुहोत् अजुहुतां जुसि

च इगन्तस्याङ्गस्य गुणो अजुहवुः उभे अभ्यस्तं पाठद्वित्वप्रकारेणोच्चे विहि

ते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः सिजभ्यस्तविदिभ्यश्च इति जेर्जुस् स्यात् हूयात् हूयात् अ

हौषीत् भी भये बिभेति भियोऽन्यतरस्यां इत्वं वा हलादौ क्ङिति सार्वधातुके बिभितः

ल॰ कौ॰ ३३ बिभीतः बिभ्यति बिभयांचकार बिभाय भेता भेष्यति बिभेतु बिभितां अबिभेत् बिभियात् भीया
त् अभैषीत् अभेष्यत् ह्री लज्जायां जिह्रेति जिह्रीतः जिह्रियति जिह्रयांचकार जिह्राय ह्रेता ह्रेष्य
ति जिह्रेतु अजिह्रेत् जिह्रीयात् ह्रीयात् अह्रैषीत् अह्रेष्यत् ॥ पॄ पालनपूरणयोः अर्तिपिपर्त्यो
श्च अभ्यासस्य इः स्यात् श्लौ पिपर्ति उदोष्ठ्यपूर्वस्य अंगावयवोष्ठ्यपूर्वो य ऋत् तदन्तस्यांगस्य उत् हलि च रे
फवांतयोरुपधाया इको दीर्घो हलि पिपूर्तः पिप्रति पपार शॄदॄप्रां ह्रस्वो वा किति लिटि पप्रतुः
पप्रुः २ ऋच्छत्यॄतां तौदादिकस्य ऋच्छे ... ऋदन्तानां च गुणो लिटि पपरतुः वृतो वा वृङ्वृञ्
भ्यां ऋदन्ताच्चेटो दीर्घो वा न तु लिटि परिता परीता परिष्यति परीष्यति पिपर्तु अपिपः अपिपृ
तां अपिपरुः पिपूर्यात् पूर्यात् अपारीत् सिचि च परस्मैपदेषु अत्र वृतः इटो न दीर्घः अपारिष्यत्
अपरिष्यत् अपरीष्यत् ओहाक् त्यागे जहाति जहातेश्च इद्वा स्याद्धलादौ क्ङिति सार्वधातुके न
क्तिः ई हल्यघोः श्नाभ्यस्तयोरातः ईत् स्यात् सार्वधातुके क्ङिति हलि जहीतः [illegible] श्नाभ्यस्त
योरातः लोपः क्ङिति सार्वधातुके जहति जहौ हाता हास्यति जहातु जहितात् जहीतात् जहितां तौ॰ १
जहीतां आ च हौ जहानेत्यादि दीर्घः जहाहि जहिहि जहीहि अजहात् अजहुः लोपो यि जह्या ३३

नेरा नोलोपोयादैा सार्वधातुके नस्यात् यलि क्ङिङ्त्यनेनाकारस्य एत्वं स्यात् हेयात् अहासीत् अ
हास्यत् ॥ माङ् माने शब्दे च ञ्माङ्मिन् भृञ् माङ् ओहाङ् एषामभ्यासस्येत् स्यात् श्लौ मिमीते
मिमाते मिमते ममे माता मास्यते मिमीतां अमिमीत मिमीत मासीष्ट अमास्त अमास्यत ओ
हाङ् गतौ जिहीते जिहाते जहे हाता हास्यते जिहीतां अजिहीत डुभृञ् धारणपोषणयोः बि
भर्ति बिभृतः बिभ्रति बिभृते बिभरांचकार बभार बभर्थ बभृव बिभरांचक्रे बभ्रे भर्ता भरिष्य बभृम ५
ति बिभर्तु बिभराणि बिभृतां अबिभः अबिभृतां अबिभरुः अबिभृत बिभृयात् बिभ्रीत भ्रि
यात् भृषीष्ट अभार्षीत् अभृत अभरिष्यत् ॥ डुदाञ् दाने २ ददाति दत्ते ददौ दाता दास्यति
ददातु घ्वसोरेत्वं देहि दत्तं अददात् अदत्तां दद्यात् ददीत देयात् दासीष्ट अदात् अदा
तां अदुः स्थाघ्वोरिच्च अनयोरिदंतादेशः सिच्च कित्स्यात्मनेपदेषु अदित अदास्यत् डुधाञ्
धारणपोषणयोः दधाति द्धिकृतस्य धातोर्बशो भष् तथोः परयोः धत्तः दधति दधासि धत्थः
दधामि धत्से दधाथे धत्तु धेहि णिजिर् शौचपोषणयोः णिजां त्रयाणां गुणः श्लौ निजविज विषामभ्यासस्य
गुणः श्लौ नेनेक्ति नेनिक्तः नेनिजति नेनिक्ते निनेज निनिजुः नेक्ता नेक्ष्यति नेक्ष्यते नेनेक्तु

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

देयात् ग्लात् २ अथ ताडते ग्रहिज्येति संप्रसारणं विध्यति विव्याध विविधतुः विविधुः विव्य
धिथ व्यद्धा व्यत्स्यति विध्यतु अविध्यत् विध्येत् विध्यात् अव्यात्सीत् अव्यत्स्यत् पुष पुष्टौ पुष्य
ति पुपोष पुपोषिथ पोष्टा पोक्ष्यति २ पुषादीत्यङ् अपुषत् शुष शोषे शुष्यति शुशोष अशुष
त् णश अदर्शने नश्यति ननाश नेशतुः रधादिभ्यश्च वलादेरार्धधातुकस्येड्वा नेशिथ मस्जि
नशोर्झलि नुम् ननंष्ठ नेशिव नेशिम नेश्म नेशिता नंष्टा नशिष्यति नंक्ष्यति नश्यतु अन
इतिप शत् अनशत् षूङ् प्राणिप्रसवे सूयते सुषुवे सुषुविषे सुषुविढ्वे सोता सविता ॥ दूङ् परि
मर्दं तापे दूयते दीङ् क्षये दीयते दीङो युडचि क्ङिति दीङः परस्माज्जातेर्ङिति न स्यार्धधातुकस्य युट्।
बुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ दिदीये मीनातिमिनोतिदीङां ल्यपि च एचामात्वं ल्यपि चा ॐ
त् अशितीत्येव दाता दास्यते जनी प्रादुर्भावे ज्ञाजनोर्जा अनयोर्जादेशः स्यात् शिति जा
यते जज्ञे जनिता जनिष्यते दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यां च्लेः चिण् वा एकव
चने तशब्दे परे चिणो लुक् चिणः परस्य लुक् जनिवध्योश्च अनयोर्वृद्धिर्न चिणि ञ्णिति च अजनि
अजनिष्ट दीपी दीप्तौ दीप्यते दिदीपे अदीपि अदीपिष्ट पद गतौ पद्यते पेदे पत्ता पद्येत
त

ल. कौ. ३५

35

विद्येषदः ३ ब्रुद्धिणिपदे अपादि अपत्सातां अपत्सत विदसत्तायां विद्यते वेत्ता ३ युधसंप्रहा
रे युध्यते योद्धा योत्स्यते युत्सीष्ट अयोधि अयुद्ध अयुत्सातां युधसंप्रहारे युध्यते योद्धा अ
युद्ध ३ सृजविसर्गे सृज्यते संसृज्यते संसृजे ससृजिषे सृजिदृशोर्झल्यमकिति अनयोरम् झ कि ३
लादावकिति स्रष्टा स्रक्ष्यते स्रक्षीष्ट असृष्ट असृक्षातां मृषतितिक्षायां मृष्यति मृष्यते म
मर्ष ममर्षिथ ममृषे ममृषिषे मर्षितासि मर्षितासे मर्षिष्यति मर्षिष्यते ॥ णहबंधने ॥
नह्यति ननाह ननद्ध नेहिथ नद्धा नत्स्यति अनात्सीत् अनद्ध ॥ इति दिवादयः ॥ षुञ् अभिषवे स्वा
दिभ्यः श्नुः शपोपवादः सुनोति सुनुतः हुश्नुवोः सार्वधातुके सुन्वन्ति सुनुवः सुनुमः सुनुते सुन्वा
ते सुन्वते सुन्वहे सुनुमहे सुषाव सुषुवे सोता सुनु सुनवानि सुनवै सूयात् सूयात् स्तु
ञ्भ्यः परस्मैपदे सिच इट् असावीत् असोष्ट चिञ् चयने चिनोति चिनुते विभाषा चेः अभ्यासात्
कुत्वं वा सन्लिटोः चिकाय चिचाय चिक्ये चिच्ये अचैषीत् अचेष्ट ॥ स्तृञ् आच्छादने स्तृणोति
स्तृणुते शर्पूर्वाः खयः अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो लुप्यन्ते तस्तार तस्तरतुः तस्तरे
गुणोर्तिसंयोगाद्योः स्तर्यात् ऋतश्च संयोगादेः ऋदन्तात्संयोगादेर्लिङ्सिचोरिड्वा आत्मने स्तरिषी ३५

स्तृपर

ष्ट स्तवीष्ट अस्तविष्ट अस्तव्ष्ट धुञ् कम्पने धुनोति धनुते दुधाव दुधुवे अधौषीत् अधोष्यत् ...
... स्तरनीनिवेद् इधविथ इधोथ ... क्रिणाति ... प्रियपकाच
अगांनाख्यविकितिमिनि इद्रनद्दनिर्क्षीदिनियमात्रिनंरद्द इधविथ अधावीत् अधाविष्टां अधोष्ट
इत्यिक्त्वादि ॥ नुदव्यथने नुदादिभ्यः शः शपोपवादः नुदति नुदते नुनोद नोदिष्य नुनुदे नो
ना अनौत्सीत् अनुत्त एवदघेरणो । नुदति नुदन्ते नुनोद नुनुदे नोक्ता भ्रस्जपाके ग्रहिज्यास
स्वपुत्वेनशः स्वस्जस्वेनजः भृज्जति भृज्जते भ्रष्टे रोपधयोरमन्यतरस्यां भ्रस्जेरपसोपधायाश्च
स्थानेरमागमोचार्धधातुकेमित्वादंत्यादचः परोयं स्थानेनिर्देशाद्रोपधयोर्निवृत्तिः वभर्ज व
भर्जतुः वभर्जिथ वभ्रज्ज वभ्रज्जतुः वभ्रज्जिथ स्कोरितिसलोपः अञ्जेनिषः वभ्रष्ट वभर्ष्ठ वभ्रज्जेन
ष्टा भ्रष्टा ज्ञिनिरमागमं वाधित्वासंप्रसारणं प्रवंप्रतिषेधेन भृज्ज्यात् भृज्ज्यास्तां भृज्ज्यासुः अभ्र
ष्ट अभार्क्षीत् अभ्राक्षीत् अभर्ष्ट अभ्रष्ट कृषविलेखने कृषति कृषते चकर्ष चकृषे अनुदात
स्वरदुपधस्यामन्यतरस्यां उपदेशेअनुदात्तोयस्मऋदुपधस्तस्याम्वाक्लादावकिति क्रष्टा कर्ष्टा ।
कृष्यात् कृक्षीष्ट स्पृशमृशकृषतृपदृपांछ्रेः सिज्वावक्तव्यः अकार्क्षीत् अक्राक्षीत् अकृक्षत् अकृष्ट

ल॰ कौ॰ ३९ अमुञ्चतां अमुञ्चत २ मुच्लृ मोक्षणे ऌदिच्चादीनां मुञ्चति मुञ्चते मोक्ता मुच्यात् मुक्षीष्ट अमुचत् ।
अमुचत अमुचतां ॥ लुप्लृ छेदने लुम्पति लुम्पते लोप्ता अलुपत् अलुप्त विद्लृ लाभे विन्दति विवेद वि
36 विदे व्याघ्रभूतिमते सेट् वेदिता भाष्यमतेऽनिट् वेत्ता षिच क्षरणे सिञ्चति सिञ्चते लिपिसिचिह्वश्च
आत्मनेपदेष्वन्यतरस्यां लिपिसिचिह्वः परस्मैपदेष्वङ् असिचत् असिचत असिक्त कृ
विक्षेपे [illegible] किरति चकार चकरतुः चकरुः करिता करीता अकारीत् गॄ निगरणे अचि
पा॰६ विभाषा गिरतेरेफस्य लो वा जादेः गिरति गिलति जगार जगाल जगरिथ जगलिथ गरिता गरीता
गलिता गलीता ॥ प्रच्छ ज्ञीप्सायां पृच्छति पप्रच्छ पप्रच्छतुः पप्रच्छुः प्रष्टा प्रक्ष्यति अप्राक्षीत् ॥
मृङ् प्राणत्यागे म्रियतेर्लुङ्लिङोश्च [illegible] म्रियते म
मार ममर्थ ममृव मर्ता मरिष्यति मृषीष्ट अमृत इति तुदादिः ॥ रुधिर् आवरणे रुधादिभ्यः
हेहः६ श्नम् शाधोपवादः रुणद्धि [illegible] रुन्धः रुन्धन्ति रुणत्सि रुन्धः रुन्ध रुणध्मि रुन्ध्वः
रुन्ध्मः रुन्धे रुन्धाते रुन्धते रुन्त्से रुन्धाथे रुन्ध्वे रुन्धे रुन्ध्वहे रुन्ध्महे रुरोध रुरुधे रोद्धा रोत्स्यति रु
णद्धु रुन्धात् रुन्धां रुन्धन्तु रुन्धि रुणधानि रुणधाव रुन्धां रुन्धातां [illegible] रुणधै रुणधावहै रु ३८

ताधामहे अस्कणन् अस्कंधां अस्कंधन् अस्कणन् अस्कंधं अस्कंद्ध अस्कणध्वं अस्कंत्स्व अस्कंत्स्म अस्कंत्स्म स्कं
ध्यात् स्कंधीत स्कध्यात् स्कन्सीष्ट अस्कन्त् न अस्कान्सीत् अस्कान्स्यत् ॥ एवं भिदिर् विदारणे छिदिर्
द्वैधीकरणे युजिर् योगे शिष्लृ विशेषणे शिनष्टि शिष्टः शिंषंति शिनक्षि शिनेषि शिशेषिथ
शेष्टा शेक्ष्यति शेषिः शिशेष शिनषाणि अशिनट् शिष्यात् अशिषत् अशेक्ष्यत् एवं पिष्लृ सं
चूर्णे भंजो आमर्दने अनिदितां लोपः भनक्ति बभंज अभांक्षीत् भुज पालनाभ्यवहारयोः भुनक्ति ।
भोक्ता भोक्ष्यति अभुनक् ञिइंधी दीप्तौ ॥ इंधे इंधाते इंधते इंत्से इंधांचक्रे इंधिता इंधां इंधातां
इंधतां इंध्यै ऐंध ऐंधातां ऐंधत विद विचारणे विंते वेत्ता इत्यादिः ॥ तनु विस्तारे तनादिकृ
ञ्भ्य उः शपोऽपवादः तनोति तनुते ततान तेने तनिता तनिष्यति तनोतु तनुतां अतनोत् अत
नुत तनुयात् तन्वीत तन्यात् तनिषीष्ट अतनीत् अतानीत् तनादिभ्यस्तथासोः तनादेः सिचो अ४
वा लुक् अतथाः अतत अततिष्ट अतथाः अतनिष्ठाः अतनिष्यत् अतनिष्यत षणु दाने सनो
ति सनुते ये विभाषा यादेशः प्रत्यये परे आत्वं वा स्यात् सायात् सन्यात् जनसनखनां सञ्झलोः यथा
साकारो जलादौ क्ङिति च असात असनिष्ट असाथाः असनिष्ठाः क्षणु हिंसायां क्षणोति क्षणुते

ल॰ कौ॰ ३२

37

ह्म्यंतेतिनवृद्धिः अक्षणीत् अक्षत अक्षणिष्ट अक्षथाः अक्षणिष्ठाः क्षिणुच उप्रत्ययेलघूपधगुणो
वा क्षेणोति क्षिणोति अक्षेणिष्ट तृणोति तर्णोति तृणुते तर्णुते डुकृञ्करणे करोति
अतउत्सार्वधातुके कुरुतः नभकुर्छुरां अस्यकुर्छुरोरुपधायानदीर्घः कुर्वंति नित्यंकरोतेः करो
तेःप्रत्ययोकारस्यनित्यंलोपोम्वोः कुर्वः कुर्मः कुरुते चकार चकर्थ चकृव चकृम चक्रे कर्ता क
कु रिष्यति करोतु कुरुतात् अकरोत् अकुरुत येच कुर्यउलोपोयादौप्रत्ययेपरे कुर्यात् कुर्वीत क्रिया
त् कृषीष्ट अकार्षीत् अकृत अकरिष्यत् संपरिभ्यांकरोतेःभूषणेसमवायेचसुट् संस्करोति अ
लंकरोतीत्यर्थः संस्कुर्वंति संघीभवंतीत्यर्थः ॥ संपूर्वस्यक्वचिदभूषणेपिसुट् संस्कृतंभक्षाइति
ज्ञापकात् उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु कृञःसुट् चात्प्राग्युक्तयोरर्थयोः प्रतियत्नोगुणा
त धानं विकृतमेववैकृतंविकारः वाक्याध्याहारंआकांक्षितैकदेशपूरणं उपस्कृताकन्या उपस्कृताब्राह्म क्री
णाः एधोदकस्योपस्कुरुते उपस्कृतंभुंक्ते उपस्कृतंब्रूते वनुयाचने वनुते ववने मनुअवबोधने
मनुते मेने मनिता मनिष्यते मनुतां अमनुत मन्वीत मनिषीष्ट इतितनादि डुक्रीञ्द्रव्यविनिमये क्र्या२
क्र्यादिभ्यःश्ना आतोपवादः क्रीणाति ईहल्यघोः क्रीणीतः श्नाभ्यस्तयोरातः क्रीणंति क्रीणासि ३२

क्रीणीथः क्रीणीथ क्रीणामि क्रीणीवः क्रीणीमः क्रीणीते क्रीणीषे क्रीणाथे क्रीणीध्वे क्रीणे क्रीणी-
वहे क्रीणीमहे ॥ चिक्राय चिक्रियतुः चिक्रेथ चिक्रिये क्रेष्यते क्रीणातु क्रीणीतात् क्रीणीतां क्रीणी-
तां क्रीणीयात् क्रीणीत क्रीयात् क्रेषीष्ट अक्रैषीत् अक्रेष्ट अक्रेष्यत् अक्रेष्यत ॥ प्रीञ् तर्पणे कान्तौ च ।
प्रीणाति प्रीणीते श्रीञ् पाके श्रीणाति श्रीणीते मीञ् हिंसायां प्रमीणाति प्रमीणीते मीनाती
त्यात्वं ममौ मिम्यतुः ममिथ ममाथ मिम्ये माता मास्यति मीयात् मासीष्ट अमासीत् अमासि
ष्टां अमास्त षिञ् बन्धने सिनाति सिनीते सिषाय सिष्ये सेता स्कुञ् आप्रवणे स्तम्भु स्तुम्भु स्कं-
स्कं३१ भु स्कुम्भुः श्नुश्च वा ॥ स्कुनोति स्कुनाति स्कुनीते चुस्काव चुस्कुवे स्कोता अस्कौषीत् अ-
ज१ स्कोष्ट स्तम्भ्वादयः चत्वारः सौत्राः सर्वे रोधनार्थाः परस्मैपदिनः हलः श्नः शानज्झौ स्तभान स्तम्भु
स्तुम्भु स्कम्भु स्कुम्भु स्कुञ्भ्यः श्नुश्च वा ॥ अस्तभत् अस्तम्भीत् युञ् बन्धने युनाति युनीते योता क्नू-
ञ् शब्दे क्नूनाति क्नूनीते क्नविता द्रूञ् हिंसायां द्रूणाति द्रूणीते पूञ् पवने प्वादीनां ह्रस्वः प्वा-
सू ७१ दि लूञ् स्तृञ् कृञ् वृञ् धूञ् शॄ पॄ वॄ भॄ मॄ दॄ जॄ झॄ धॄ नॄ कॄ ॠ गॄ ज्या री ली व्ली प्ली नां च नवविंशतीनां शितिः पुनाति पु-
नीते पविता लूञ् छेदने लुनाति लुनीते स्तृञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरतुः

ल। कौ। १८ तस्तरे स्तरिता स्तरीयात् स्तरीत् स्तीर्यात् लिङ्सिचोरात्मनेपदेषु वृङ्वृञ्भ्यामृदंताच्च परयोर्लिङ्
सिचोरिट् वा न लिङि. स्तरिषीष्ट स्तीर्षीष्ट २ सिचि च परस्मैपदेषु अस्तारीत् अस्तारिष्टां अस्तारिषुः अस्तरिष्ट
अस्तीष्टेति कित्त्वं अस्तीर्ष्ट कॄ हिंसायां कृणाति कृणीते चकार चकरे वॄ वरणे वृणाति वृणीते ववार
३८ ववरे वरिता उदोष्ठ्यपूर्वस्य वूर्यात् वरिषीष्ट वूर्षीष्ट अवारीत् अवारिष्टां अवारिषुः अवरिष्ट अवूर्ष्ट अ-
५ दुधविम ञ् कम्पने धुनाति धुनीते दुधाव दुधुवे धोता धविता स्तुसुधूञ्भ्यः परस्मैपदेषु अधावीत्
अधविष्ट अधोष्ट ग्रह उपादाने गृह्णाति गृह्णीते जग्राह जगृहे ग्रहोऽलिटि दीर्घः एकाचो ग्रहोऽपि विहितस्ये-
टः दीर्घो न लिटि ग्रहीता गृह्णातु गृहाण गृह्यात् ग्रहीषीष्ट ह्म्यंतेति न वृद्धिः अग्रहीत् अग्रहीष्टां
अग्रहीष्ट अग्रहीषातां कुष निष्कर्षे कुष्णाति कोषिता निरः कुषः वलादेरार्धधातुकस्येड्वा निष्को-
षिता निष्कोष्टा निरकोषीत् निरकुक्षत् अश भोजने अश्नाति आश अशिता अशिष्यति अश्नातु
अशान ज्ञा अवबोधने जानाति जज्ञौ पॄ पालनपूरणयोः पृणाति शॄ हिंसायां शृणाति शॄदॄप्रां ह्रस्वो वा
ति ऋ स्वपदेयण् शश्रतुः शशरतुः दॄ विदारणे दृणाति ददरतुः दद्रतुः जॄ वयोहानौ जृणाति मु-
ष स्तेये मुष्णाति मोषिता पुष पुष्टौ पुष्णाति पोषिता बंध बंधने बध्नाति बबंधिथ बबंध बंद्धा भंत्स्यति १८

वृणीते१

क्लिशश्चविबाधने क्लिश्नाति क्लेशिता क्लेष्टा अक्लेशीत् अक्लिक्षत् वृङ् संभक्तौ वृते वव्रे ववृढे व

रिता वरीता अवरिष्ट अवृत इति क्र्यादिः ॥ चुर स्तेये समानपाशाद्रूपवीणातूलश्लोकसेनालो

मत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् एभ्यो णिच् स्वार्थे पुगन्ते क्तिणः सनाद्यन्ता इति धातुत्वे ति

प् पुगन्तलघूपधस्य गुणः चोरय इति णिचश्च णिजन्तादात्मनेपदं कर्तृगामिनि क्रियाफले चो फ४

रयते चोरयामास चोरयिता चोर्यात् चोरयिषीष्ट णिश्रीति चङ् णौ चङ्युपधाया ह्रस्वः द्वित्वं हला

दिःशेषः दीर्घो लघोरित्यभ्यासस्य दीर्घः अचूचुरत् कथ वाक्यप्रबन्धे अतो लोपः अचः परस्मिन्

पूर्वविधौ परनिमित्तोऽजादेशः स्थानिवत् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इति

स्थानिवत्वान्नोपधावृद्धिः कथयति अचीकथत् दीर्घसन्वद्भावौ न अचकथत् गण संख्याने

गणयति ई च गणः गणयतेरभ्यासस्येत्स्यात् चङ्परे अजीगणत् अजगणत् इति चु

रादिः स्वतन्त्रः कर्ता क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् तत्प्रयोजको हेतुश्च कर्तृः प्रयोज

को हेतुसंज्ञः कर्तृसंज्ञश्च हेतुमति च प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच् भवन्तं प्रेरयति

भावयति ओः पुयण्ज्यपरे सनि परे यदङ्गं तदवयवाभ्यासोतः इत्स्यात् पवर्गयणि जकारेष्ववर्णपरे

स१

धातुद्वयोमितः २

लं॰ कौ॰ २९

परतः अवीभवत् छागान्तिनिवृत्तो अर्जिह्रीड्ब्रीरीकु[illegible]पीस्नायातां पुकणोस्यापयति निष्ठृतेरि

त् उपधायाष्यङ्परेणो अनिष्टिपत् घटवेष्टायाँमितोह्रस्वः घटादीनां त्वपादीनां च स्येपति अजीघ

टत् अजि त्रपत् शाक्कासावाद्वेपांधुकणो पाययति धातोःकर्मणःसमानकर्तृकादिच्छायां

वा इषिकर्मणोधातोरिषिणोवावाच्यकान्स्सनिकायां पक्कणकायावाचि इट् सन्यङोः सन्ततस्य

यङंतस्यचप्रथमस्यैकाचोद्वेलाजादेस्तुद्वितीयस्य सन्यतः अभ्यासस्यात इत्वं पठितुमिच्छति

पिपठिषति कर्मणः किं गामेनेच्छति समानकर्तृका किं शिष्याः पठंतु इतीच्छति गुरुः वाथ

द्रुणाद्यावमपि लुङ् सनोचेत् सस्यार्धधातुके अत्तुमिच्छति जिघत्सति पक्ताचेत्तिनेइ अन्ठ

नगामांसमति अत्तुं नानाङ्हृते रि[illegible]वेघातमेघ्रदीवीचकलादेसनि इकोवाल् इगंतोंधकलादि सन्

कित् अत् नइहातोः वर्तुमिच्छति विवर्तिषति सनिग्रहेगुहेश्च ग्रहेर्गुहेरुगंतास्य सनइएनर्स

त् कुत्रूषति धातोरेकाचो हलादेः क्रियासमभिहारे यङ् पौनःपुन्येभृशार्थेवयोन्त्येधातोरेका

चो हलादेर्यङ् गुणोयङ्लुकोः अभ्यासस्यगुणोयङि यङ्लुकिचपरतः द्विरंतत्वादात्मनेपदं पु

नःपुनरतिशायेनवाभवति बोभूयते बोभूयांचक्रे अबोभूयिष्ट नित्यंकोटिल्येगतो गत्यर्थात्कौ

लोपरे उपधायाह्रस्वः २

५२

सस्यातः स्यात्स्या

शाबाद्धातुवे

[illegible]

२९

जिघांसति हनिच द्रुणाभिः ननुवोधने गमेरिटप[illegible]पदं ४ जिगमिषति ४

दिल्येवं यङ् नित्यक्रियासमभिहारे दीर्घोकितः अकितोभ्यासस्य दीर्घो यङ्यङ्लुकोः अङ्गिलं व्रज

तिवा व्रज्यते यस्य हलः हलः परस्य यस्य लोपः आर्धधातुके आदेः परस्य अन्त्यलोपः वाव्रज्यांच

क्रे वाव्रजिता रीगृदुपधस्य च ऋदुपधस्य धातोरभ्यासस्य रीगागमो भवति यङ्यङ्लुकोः वरीवृ

त्यते वरीवृतांचक्रे वरीवृतिता हुग्रादिषु च हुग्रादावाहृतिगणे एतवं न नरीनृत्यते जरीगृह्यते ३

यङोचि च यङोऽचि परे लुक् स्यात् चकारात् अञ्जविनापि क्वचित् अनैमित्तिकोयमन्तरंगत्वादादौ भ

वति ततः प्रत्ययलक्षणेन यङ् तत्वात् द्वित्वमभ्यासस्य कार्यं धातुत्वाद् लडादयः शेषात्कर्तरीति प

रस्मैपदं चर्करीतं चेत्यदादौ पाठात् शपो लुक् यङो वा यङन्तात्परस्य हलादेः पितः सार्वधातुक

स्येड् वा स्यात् भूसुवोस्तिङि निषेधो यङ्लुकि भाषायां न बोभूतु तेतिक्ते इति निपातनात् बो

भवीति बोभोति बोभूतः बोभुवति बोभवीषि बोभोषि बोभूथ बोभवीमि बोभोमि बोभूवः बो

भूमः बोभवांचकार बोभवांबभूव बोभवामास बोभविता बोभविष्यति बोभवीतु बोभोतु बो

भूतात् बोभूतां बोभवतु बोभूहि बोभवानि अबोभवीत् अबोभोत् अबोभूतां अबोभुवुः बोभूयात्

बोभूयातां बोभूयुः बोभूयात् बोभूयास्तां बोभूयासुः गातिस्थेति सिचो लुक् यङो वेतीट् परे गुण

लं कौं पं

त्वं वा बाधित्वा नित्यत्वाद्वुक् अश्वोऽभूवीत् अश्वोऽभूत् अश्वोऽभूतां अश्वौ अश्वोऽभूवः अश्वोऽभविष्यत् इति
लिङ् सन्यङ्लुगन्ताः सुप आत्मनः क्यच् इत्यधिकारः पाणिनीयानां सम्बन्धिनः सुबन्तादिच्छाया
मर्थे क्यच् स्यात्॥ सुपो धातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लुक् क्वचिच्च अवर्णस्य ईत्वमात्म
नः पुत्रमिच्छति पुत्रीयति। मांसमिच्छतीति कस्सुबन्तादित्यपाद्य क्यच् किमिच्छतीत्यत्र इच्छतीति नः
मेव के क्वचिच्चपङ्क्तिनान्तेऽपदं नाम्नान्तनलोपः राजीयति नान्तमेवेति किं वाच्यति इति च गी
र्येति गर्येति धातोरित्येव नेह दिवमिच्छति दिव्यति क्यस्य विभाषा हलः परयोः क्यच् क्य
उ पो द्वैलीकाद्युयोके आरः परस्य आतोलोपः नस्यस्यानिवत्वाद्धपधलोपेन समिधिपनायाम्य
च उक्तविषये काम्यच् पुत्रमात्मन इच्छति पुत्रकाम्यति उपमानादाचारे उपमानादाचारेऽर्थे
क्यच् पुत्रमिवाचरति पुत्रीयति छात्रं विष्णूयति द्विजं सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः
अश्वो गर्दभो कृष्ण इवाचरति कृष्णति के इवाचरति स्व इवाचरति स्वतीति वा अनुनासिकस्य क्वि
दे २ झलोः क्ङिति अनुनासिकस्यान्तस्योपधाया दीर्घः स्यात् झौ झलादौ ङिति इदमिवाचरति इदाम
ति राजेवाचरति राजानति पन्था इवाचरति पथीनति ॥ वा व्याप्यकर्मणे चतुर्थ्यन्तात् ॥ पं

कष्टमात्यानुक्तमाहैश्वर्ये वर्तते कष्टाय क्रमते कष्टायते पापं कर्तुमुत्साहते इत्यर्थः शब्दवैरकलहाभ्रक
ण्वमेघेभ्यः करणे शब्दः करोत्यर्थे क्यङ् शब्दं करोति शब्दायते नन्वकरोति नन्दाचेष्टिसंदीप्तिष्वानात्
प्रातिपदिकाद्धात्वर्थे इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोप
स्थस्फाद्यादेशभसंज्ञास्तद्वण्णिचपि स्युरित्यन्ये इष्ठः घटं करोत्याचष्टे वा घटयति ॥ इतिना
मधातुप्रक्रिया ॥ कण्ड्वादिभ्यो यक् एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे कण्डूञ् गात्रवि
घर्षे कण्डूयति कण्डूयते इत्यादि धातोरेकस्मात्तद्भावे क्रियाविनिमये चोऽन्यकर्तृकेऽत्मने।
पदं व्यतिलुनीते अन्यस्य योग्यं लवनं करोतीत्यर्थः नगतिहिंसार्थेभ्यः व्यतिगच्छन्ति व्य
तिघ्नन्ति नेर्विशः निविशते परिव्यवेभ्यः क्रियः परिक्रीणीते विक्रीणीते अवक्रीणीते।
विपराभ्यां जेः विजयते पराजयते समवप्रविभ्यः स्थः संतिष्ठते अवतिष्ठते प्रतिष्ठते
वितिष्ठते अपह्नवे ज्ञः शतमपजानीते सर्पिषो ज्ञानं पायेनवर्तत इत्यर्थः उदश्चरः सकर्मका
त् धर्ममुच्चरते उल्लङ्घ्य गच्छतीत्यर्थः समस्तृतीयायुक्तात् रथेन संचरते दाणश्च सा चेच्चतुर्थ्यर्थे
समो गम्यृच्छिभ्यां तृतीयान्तेन युक्तात् प्रयोगात्तृतीया चतुर्थ्यर्थे दास्या संयच्छते कामी ॥ एवं

प्रातिपदिकाद्धात्व
बहुलमिष्ठवच्च
३

वी१

वत्सेत्वः सतः पूर्वेयोधात्वेनेनत्वस्य सर्वत्रनादयात्मनेपदं स्यात् इदिधिषतेहलंतात्व सकर्मीपाद्
लः परोकलादिः सनकिननिविविदते गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयो
गेषुकृञः गंधनंहिंसा उत्कुरुते सूचयतीत्यर्थः अवक्षेपणं भर्त्सनं श्येनोवर्तिकामुदाकुरुते भर्त्स
यतीत्यर्थः हरिमुपकुरुते सेवते परदारान्प्रकुरुते तेषुसहसाप्रवर्तते एधोदकस्योपस्कुरुते गुण
माधत्ते कथाः प्रकुरुते प्रकथयति शतंप्रकुरुते धर्मार्थंविनियुंक्ते एषुकिं कटंकरोति भुजोन
वने ओदनंभुंक्ते अनवनेतिकिं महींभुनक्ति अस्मात्मनेपदक्रिया अनुपराभ्यांकृञः कर्तृगेच फ
लेगंधनादौचवाक्षेपरस्मैपदंस्यात् अनुकरोति पराकरोति अभिप्रत्यतिभ्यः क्षिपः क्षिपप्रेर
णे स्वरितेत् अभिक्षिपति प्राद्वहः प्रवहति परेर्मृषः परिमृष्यति व्याङ्परिभ्योरमः रमुक्रीड
यां विरमति उपाच्च यज्ञदत्तमुपरमति उपरमयतीत्यर्थः अंतर्भावितण्यर्थोयं इतिपदव्यव
स्था भावकर्मणोः लस्यात्मनेपदं सिद्धधातुवोयक् भावकर्मवाचिनि धातोर्यक् सार्वधातुके भा
वः क्रियासाचभावार्थत्वात् कारकेणानन्वयात् नचयुष्मदस्मद्भ्यां समानाधिकरण्याभावात्प्रथमपुरु
षः तिङ्वाच्यक्रियायाअद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्नद्विवचनादि किंत्वेकवचनमेवोत्सर्गतः ४८

त्वयामया अन्वैरनुभूयते बभूवे स्नासिच् सीयुट् तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वाचि
एवदिट् च ॥ उपदेशे योऽच् तेषां हनादीनां च चिण्वद्वा कार्यं तस्मात् स्यादिषु भावकर्मणो
र्गम्यमानयोः स्यादीनां इडागमश्च चिण्वद्भावपक्षे चापरमिट् चिण्वद्भावाद्वृद्धिः भाविता भविता
भाविष्यते भविष्यते भूयतां अभूयत भूयेत भविषीष्ट ॥ चिण् भावकर्मणोः च्लेश्चिण् भावकर्म
वाचिनि तशब्दे परे चिणो लुक् अभावि अभाविष्यत अभविष्यत सकर्मकोऽप्युपसर्गवशात्स
कर्मकः अनुभूयते आनन्दः चैत्रेण त्वया मया वा अनुभूयेते अनुभूयन्ते त्वमनुभूयसे अहमनुभू
ये अन्वभावि अन्वभाविषातां णिलोपः भाव्यते भावयांचक्रे भावयांबभूवे भावयामासे भा
वयिता चिण्वदिट् आभीयत्वेनासिद्धत्वाण्णिलोपः भाविता भाविष्यते भावयिष्यते भाव्यतां अ
भाव्यत भाव्येत भाविषीष्ट अभावि अभाविषातां अभावयिषातां बुभूष्यते बुभूषांचक्रे बुभूषिता
बुभूषिष्यते बोभूयते स्तुस्नुलोः अकृत्सार्वधातुकयोर्दीर्घः स्तूयते विष्णुः स्ताविता स्तोता स्ताविष्य
ते स्तोष्यते अस्तावि अस्ताविषातां अस्तोषातां ऋगतौ गुणोऽर्तीति गुणः अर्यते स्मृ स्मरणे स्मर्यते
सस्मरे उपदेशग्रहणाच्चिण्वदिट् आरिता अर्ता स्मारिता स्मर्ता नलोपः स्रस्यते इदितस्तु ॥

ल: कौ: ५२

तंयते संप्रसारणं इज्यते ततोतिरथविः ततोतिरावं वास्मात् यक्तितायते तन्यते तपान्तापेच न

पतेः ञ्चेष्टिपनस्मात्वामेक तंथते नायेच अन्वनमघायेत क्रुमास्येतीतं दीयते धीयते दद्दे ग्लातास्त्र

कविणं कृतेः स्यार्दनातंयुगगाम छिणि ञ्जिमिकृतिव दायिता दाता दायिसीष्ट दासीष्ट अदायि

अदिषातां भज्यते भजेश्च चिणिनलोपोवा अभाजि अभंजि लभ्यते विभाषाचिणमुलोः लभेर्नुम्

अलंभि अलाभि यदाकर्मैव कर्तृत्वेन विवक्षितं तदासुकरमेकाणाम पिच कर्मकर्तृत्वाते भावे

कर्मस्यया चलः कर्मवत्कर्मणा तुल्यक्रियः तुल्यक्रियः कर्ता कर्मवत् स्यात् कार्यातिदेशार्थं तेनयगा

६ त्मनेपदं चिणि चिण्वदिटं सुः पच्यते फलं भिद्यते काष्ठं अपाचि अभेदि वाभावे भिद्यते काष्ठेन ॥ ३

प्र तिभाव कर्मक्रिया अभिज्ञावचने लृट् स्मृति बोधि नुपपदे भूतानद्यतने धातोर्लृट् लङोपवादः

वसनिवासे स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चेतयसे वा न यदि यद्योगे तु न अभिज्ञा

हि नासि यद्वने अभुंज्महि लङ्ङेव लिटोपवादः यत्रनिषेधविधिः वर्तमानसामीप्ये वर्तमानवद्वा ॥

वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः कदा आगतोसि अयमागच्छामि

आगमं वा कदा गमिष्यसि एषगच्छामि गमिष्यामि हेतुहेतुमतोर्लिङ् वा स्यात् कृष्णं नमेच्चेत् ५२

स्तवं यायात् कृत्स्नं नस्यामि चेत्स्तवं यास्यामि भविष्यन्त्येवेष्यते नेह इतीनिपलायते विधिनिमंत्रणे
लिङ् विधिर्भृत्यादेर्निकृष्टस्य प्रवर्तनं यजेत निमंत्रणं नियोगकरणं आवश्यके श्राद्धभोजनादौ
दौहित्रादेः प्रवर्तनं इह भुंजीत आमंत्रणं कामचारानुज्ञा अधीष्टः सत्कारपूर्वको व्यापारः पुत्रम
ध्यापयेत् संप्रश्नः भो वेदमधीयीय उत तर्कं प्रार्थनायां भोजनं लभेय एवं लोट् इति लकारार्थ
प्रक्रिया ॥ इति श्रीवरदराजभट्टविरचितायां लघुकौमुद्यां तिङन्तप्रक्रिया समाप्ता ॥ ॥
ॐ नमः सरस्वत्यै ॥ ॐ धातोः आतृतीयाध्यायान्तं ये प्रत्ययास्ते धातोः परे स्युः कृदतिङ् इति
कृत्संज्ञा वासरूपोऽस्त्रियां अस्मिन्धात्वधिकारे असरूपोऽपवादः प्रत्ययः उत्सर्गस्य बाधकः वा स्या
धिकारोक्तं विना कृत्याः ण्वुल् तृचौ विस्यन्तः प्राक्कृत्यसंज्ञाः स्युः कर्तरि कृदिति प्राप्ते तयोरे
व कृत्यक्तखलर्थाः एते भावकर्मणोरेव स्युः तव्यत्तव्यानीयरः धातोरेते स्युः एधितव्यम्
एधनीयं त्वया भावे औत्सर्गिकमेकवचनं क्लीबत्वं च चेतव्यश्चयनीयो वा धर्मस्त्वया केलिमर
उपसंख्यानं पचेलिमा माषाः पक्तव्या इत्यर्थः भिदेलिमाः काष्ठाः कर्मणि प्रत्ययः कृत्यल्यु
टो बहुलम् क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव विधेर्विधानं बहुधा

ल: कौ: ५२ समीत्वचतुर्विधं बाहुलकं वदंति स्नात्यनेन स्नानीयं चूर्णं दीयतेस्मै दानीयो विप्रः अचोयत् चेयं

जेयं ईद्यति आतः गुणः देयं ग्लेयं पोरदुपधात् पवर्गान्तादुपधात् यत् एवं नापवादः शप्यं लभ्यं

एतिस्तुशास्वृदृजुषः क्यप् ह्रस्वस्य पिति कृति तुक् इत्यः स्तुत्यः शासस्य शिष्टो शास इदङ्हलो :

शास उपधाया इत्स्यात् अङि हलादौ क्ङिति शिष्यः वृत्यः दृत्यः आदृत्यः जुष्यः जुषीप्रीतिसेव

नयोः जुष्यः मृजेर्विभाषा मृजेः क्यप् वा मृज्यः ऋहलोर्ण्यत् ऋवर्णान्ताद्धलन्ताश्च ण्यत् वार्यं

पाक्यं हार्यं चजोः कु घिण्ण्यतोः चजोः कुत्वं स्यात् घिति ण्यति च निष्ठायामनिट् इति वक्तव्यं तेन

इतनाज्यं मृजेर्वृद्धिः मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः ऽदितस्य मार्ग्यः भोज्यं भक्ष्ये भोग्य धात्

मन्यत् इति कृत्यप्रक्रिया ॥ ण्वुल्तृचौ धातोर्ण्वुल्तृचौ स्तः कर्तरि कृदिति कर्त्रर्थे युवोरनाकौ यु

नुनासिकाया ४ वुल्तयोर[illegible]लोस्तः कारकः कर्ता नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः नन्द्यादेर्ल्युः ग्रहा

देर्णिनिः पचादेरच् स्यात् नंदयतीति नंदनः जनार्दनः लवणः ग्राही स्थायी मंत्रिग्रहपविभाष

ए मंत्री पचः आकृतिगणोऽयं इगुपधज्ञाप्रीकिरः कः क्षिपः बुधः कृशः ज्ञः प्रियः किरः आत

श्चोपसर्गे कः प्रज्ञः सुग्लः गेहकः गेहकाः निपात्यते गृहं कर्मण्यण् कर्मण्युपपदे धातोरण् । ५२

कुंभं करोतीति कुंभकारः आतोऽनुपसर्गे कः अणोऽपवादः गोदः कम्बलदः अनुपसर्गे किं गो
संदायः मूलविभुजादिभ्यः कः मूलानि विभुजति मूलविभुजो रथः आकृतिगणोऽयं महीध्रः
कुध्रः चेरट् अधिकरणे उपपदे कुरुचरः भिक्षासेनादायेषु च भिक्षाचरः सेनाचरः कृञो हेतु
ताच्छील्यानुलोम्येषु पदृयोस्त्वेषु कृञष्टः अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्य
यस्य अत उत्तरस्यानव्ययविसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु यशस्करी विद्या
श्राद्धकरः वचनकरः एजेः खश् एजं तादेजेः खश् स्यात् अरुर्द्विषदजंतस्य मुम् अरुंषोद्विष
तोऽजंतस्य च मुमागमः खिदंते नत्वव्ययस्य शितावश्च्वादि एजेकाम्यते जनं एजयतीति
जनमेजयः प्रियवशे वदः खश् प्रियंवदः वशंवदः अन्येभ्योऽपि दृश्यते मनिप् क्वनिप्
वनिप् विच् एते प्रत्यया धातोः स्युः नेड्वशि कृति वधादेः सुतनः इण् एतेन मृ हिंसायां सुशर्मा प्रा
तरित्वा विड्वनोरनुनासिकस्यात् अनुनासिकस्यात् विद्विवनिच विजायतेः इति विजावा
ओणृ अपनयने अवावा रुषरिषहिंसार्थे रोट् रेट् सुगण् क्विप् अयमपि दृश्यते उखास्र
त् पर्णध्वत् वाहभ्रट् सत्यज्ञानेनोपि निसाक्षीत्य भ्रजाम्यर्थस्य पिधानेनापि निः ताकृष्टीले

घोषेव उष्णभोजी शीतभोजी मनः सुपि मन्यतेर्णिनिः दर्शनीयमानी आत्ममाने खश्च स्वकर्मके
मनने वर्तमानान्मन्यतेः सुपि खश् चाण्णिनिः पंडितमात्मानं मन्यत इति पंडितंमन्यः पंडि-
तमात्मानं मन्यत इति पंडितंमन्यः पण्डितमानी खित्यनव्ययस्य खिदन्ते नव्ययस्य ह्रस्वश्च का-
लिंमन्या अव्ययस्य तु दिवामन्या करणे यजः करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि सोमे-
नेष्टवान् सोमयाजी दृशेः क्वनिप् कर्मणि भूते पारं दृष्टवान् पारदृश्वा राजनि युधिकृञः क्व-
निप् युधिरन्तर्भावितण्यर्थः राजानं योधितवान् राजयुध्वा राजकृत्वा सहे च सहयुध्वा सप्त-
म्यां जनेर्डः ॥ तत्पुरुषे कृति बहुलं ङेरलुक् सरसिजं सरोजं उपसर्गे च संज्ञायां प्रजा ।
क्तक्तवतू निष्ठासंज्ञौ स्तः निष्ठा भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् तत्र तयोरेवेति भावकर्मणोः
क्तः कर्तरि क्तवतुः स्नातं मया स्तुतस्त्वया विष्णुः विष्णुं स्तुतवान् रदाभ्यां निष्ठातो नः पूर्वस्य
च दः रदाभ्यां परस्य निष्ठातस्य नः स्यान्निष्ठापेक्षया पूर्वस्य धातोर्दस्य च शॄ हिंसायां भिदिर् विदारणे
छिदिर् द्वैधीकरणे शीर्णः भिन्नः छिन्नः संयोगादेरातो धातोर्यण्वतः निष्ठातस्य नः संयोगादेरा-
दन्तान्निष्ठातस्य नः द्राणः ग्लानः ल्वादिभ्यः एकविंशतेर्ल्वादिभ्यः प्राग्वत् लूनः ज्याव ५४

योगात्मना गृहीत्वा हलः अंगावयवावुलः परं यत्तत्संप्रसारणं तदंतस्यांगस्य दीर्घः जीनः ड्रीदितस्य
प्राग्वत् भुजो कौटिल्ये भुग्नः स्त्रीदितो निष्ठायां स्त्रीयते दीदितश्च निष्ठायामिण्न दुर्गे ष्विर्शीनिरूढो
मूनः शुष्कः निष्ठान्तस्य शुष्कः पचो वः पक्वः क्षौ मः क्षामः यस्य विभाषा यस्य क्वचिदेति इ
तस्तो निष्ठायामिण्न गुप्तः निष्ठायां सेटि णेर्लोपः भावितः भावितवान् दफः स्फलवलयोः।
स्फुल्लवल्लवति व स्फुरति नियात्यते स्थाप्नोर्हि स्नास्थोकिति हितं शास्हो शुशिष्टस्य दारंसस्य द
द नास्थाकिति चर्त्तिदत्तं लिटः कैन स्त्रयुक्तास्य लिटः कानच् क्वसू वास्तः नक्तु नागानामनेपदम्
चकाणः स्तोश्च मांतस्य धातोर्मः स्वाः परतः जगन्वान् लटः शतृशानचावप्रथमासमाना
धिकरणे लट्चैत्तावा स्तः प्राप्नोति पचंतं चैत्रं पश्य श्रानेमुक पचन्तुगास्यैव मानं पश्य लडित्य
नु वर्त्तमाने प्रथमासामानाधिकरण्येऽपि क्वचित् सद्विजः विदः शतुर्वसुः वेत्तेः
परस्मैपदात् वसुरादेशो वा वेदकाज्ञा तु सा तु तद्वित्वानामेकाचामादंतानां वसेश्च वसा
रिट् नास्येषां विदन् विद्वान् तोसन् तोषाणैकान चो सत्संज्ञौ स्तः लटः सदा करिष्यंतं करि
ष्यमाणं पश्य श्राद्धे लक्षी तद्भेतत्साधवाविष किपमभिप्राप्यवदमाणालक्षीला

ल॰ कौ॰ ५५

जु३

दिकर्तृषु बोध्याः तृन् कर्ता कटान् जल्पभिक्षकुट्टलुण्टवृङः षाकन् षः प्रत्ययस्य प्रत्ययस्या-
दिः षइत् जल्पाकः भिक्षाकः कुट्टाकः लुण्ठाकः वराकः सनाशंसभिक्ष उः चिकीर्षुः आशंसुः भि-
क्षुः भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् विभ्राट् भाः धुर्वि हिंसायां राल्लोपः रेफाच्छ्वोर्लो-
१ पः क्वौ झलादौ क्ङिति धूः विद्युत् ऊर्क् पूः दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः जूः ग्रावस्तुत् क्वि-
ब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च वक्तीति वाक् पृच्छतीति प्राट् आयतं स्तौ-
ति आयतस्तूः कटं प्रवते कटप्रूः जूरुक्तः श्रयति हरिं श्रीः दाम्नीशसयुयुजस्तुतुदसिसिचमिह-
पतदशनहः करणे दाम्नीशादेः ष्ट्रन् करणेऽर्थे दात्यनेन दात्रं नेत्रं तितुत्रतथसिसुसरकसेषु च एषां
दशानामिण्न शस्त्रं योत्रं योक्त्रं स्तोत्रं तोत्रं सेत्रं सेक्त्रं मेढ्रं पत्रं दंष्ट्रा नद्धी अर्तिलूधूसूखनसहचर इत्रः
अरित्रं लवित्रं धवित्रं सवित्रं खनित्रं सहित्रं चरित्रं पुवः संज्ञायां पवित्रं कृवापाजिमिस्वदिसाध्यशू-
भ्य उण् करोतीति कारुः वायुः पायुर्गुदं जायुरौषधं मायुः पित्तं स्वादुः साध्नोति परका-
र्यमिति साधुः आशु शीघ्रमित्यादि उणादयो बहुलं एते वर्तमाने संज्ञायां च बहुलं स्युः केचिद-
विहिता अप्यूह्याः संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे कार्याद्विद्यादनूबन्धमेतच्छास्त्रमु ५५

णादिषु तस्मात्तु लो क्रियायां क्रियार्थायां क्रियायामुपपदे धातोरेभ्यो लृटः मांसन्नाद्भक्ष्यत्वं कृत्स्नेऽर्द
तुं याति कृत्स्नं दर्शको याति कालसमयवेलासु तुमुन् कालः समयो वेला वा भोक्तुं भावे सि
द्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् पाकः अकर्तरि च कारके संज्ञायां कर्तृभिन्ने कारके घञ्
वक्ति च भावाकरणयोरञ्जेर्नलोपः रागः अवचयः क्रिय राज्यन्तस्मिन्निति निरंगः निवासचि
ति शरीरोपसमाधानेष्वादेश्च कः पञ्चविनानेषु मादेश्च कः उपसमाधानं राशीकरणं ति
कायः आकायः गोमयनिकायः परश्च इवर्णान्तादल् चयः जयः ऋदोरप् कवर्णान्ताद
वर्णान्तादप् करः गरः शरः यवः लवः स्तवः पवः चतुर्थ्येकविधानं प्रस्थः विघ्नः द्विधः
द्विः कैर्मभिर्तं क्रियमाणानाम निवृत्त्यर्थे पाकेन निर्वृत्तं पाक्त्रिमं डुवप् उप्त्रिमं द्वितोऽथुच्
टुवेपृ कम्पने वेपथुः श्वयथुः यजयाचयतविच्छप्रच्छरक्षो नङ् यज्ञः याच्ञा यत्नः विश्नः प्र
टुड्वनामिति वेच यतजृक्षस्वपसवशासुभ्यः नतावादेशौ लोपोऽनुनासिके कोलावैद्रिन्नि च विश्नः ऊ१
प्रश्नः रक्ष्णः स्वपो नन् स्वप्नः उपसर्गे घोः किः प्रधिः उपाधिः स्त्रियां क्तिन् स्त्रीलिङ्गे भावादौ
क्तिन् वचोपवादः कृतिः श्रुवादिभ्यः क्तिन् क्तिन्निष्ठावद्धुक्त्वाः तेन नत्वं कीर्णिः गीर्णिः लूनिः

ल॰ कौ॰ ७८

46

भुक्तिः स्मृतिः संपदादिभ्यः क्विप् संपत् विपत् आपत् क्तिन्नपीष्यते सम्पत्तिः विपत्तिः आपत्तिः ऊ
तियूतिजूतिसातिहेतिकीर्तयश्च एते निपात्याः कृञः श च क्रिया कृत्या शश्च कृञः चात् क्तिन् प्रकारेण
प्रक्रिया प्रकृतिः इच्छा इषेर्निपातनोऽयं अ प्रत्ययात् प्रत्ययान्तेभ्यः स्त्रियाम् अकारः प्रत्ययः चिकीर्षा
पुत्रकाम्या गुरोश्च हलः गुरुमतो हलन्तात् स्त्रियाम् अ प्रत्ययः ईहा ऊहा ण्यासश्रन्थो युच् अ
स्याऽपवादः कारणा नपुंसके भावे क्तः ल्युट् च हसितं हसनं पुंसि संज्ञायां घः प्रायेण छादेर्घेऽद्व्युप
सर्गस्य। द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे दन्तच्छदः अद्व्यिति किं समाच्छादः अवे तॄस्त्रोर्घञ् अवसि
तिनिग्राकारः अवे तॄस्त्रोर्घञ् अवतारः अवस्तारो जवनिकेत्यमरः हलश्च हलन्तात् घञ् घा
पवादः रमन्ते योगिनोऽस्मिन्निति रामः अपमृज्यतेऽनेन व्याध्यादिकम् अपामार्गः ईषद्दुःसुषु कृच्छ्राकृच्छ्रा
र्थेषु खल् ईषदादिषूपपदेषु खल् तयोरेवेति भावे कर्मणि च कृच्छ्रे दुष्करः क
रोऽभवता अकृच्छ्रे ईषत्करः सुकरः आतो युच् खलोऽपवादः ईषत्पानः सोमो भवता दुष्पानः
सुपानः अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा प्राचामिति पूजार्थं प्रतिषेधार्थयोः अलंखल्वोरुपप
दयोः क्त्वा स्यात् अलं दत्वा घुमास्थेतीत्वं पीत्वा खलु अलंखल्वोः किं मा कार्षीः प्रतिषेधयोः ॥ ७८

किमलंकारः समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा भुक्त्वा पीत्वा व्रज
ति नक्त्वा सेट् क्त्वा कित् शयित्वा सेडिं हत्वा रलोः व्युपधाद्धलादेः संश्च इवर्णोवर्णोपधाद्धला
देरलंतात्परौ क्त्वासनौ सेटौ वा कितौ स्तः द्युतित्वा द्योतित्वा लिखित्वा लेखित्वा व्युपधात्किं वर्तित्वा र लिखित्वा ३
लःकिं सेवित्वा हलादेः किं एषित्वा सेडिं भुक्त्वा उदितो वा उदितः परस्य क्त्वा इड्वा शमित्वा शा
न्त्वा देवित्वा द्यूत्वा दधातेर्हिः हित्वा जहातेश्च हित्वा हाङः स्थित्वा समासेनञ्पूर्वे क्त्वो ल्य
प् अव्ययपूर्वपदेनञ् समासे क्त्वो ल्यबादेशः [illegible] प्रकृत्य अनञ् किं अकृत्वा अव्ययपूर्वपद
त्किं परमकृत्वा अभीक्ष्ण्ये णमञ्च पौनःपुन्ये यो धातुस्तस्माद्द्वित्वं स्यात् अभीक्ष्ण्ये द्वित्वं ते च अ
पसंज्ञे द्वित्वं नेष्यते च स्मारं स्मारं नमति गुरुं स्मृत्वा स्मृत्वा पायं पायं भोजं भोजं श्रावं श्रावं अ
न्यथैवं कथमित्थं सु सिद्धः प्रयोगाप्रयोगस्य एवंभूतः चेत्कृञ् अर्थवत्वात्प्रयोगानर्थक्ये इत्यर्थः अ
न्यथाकारं एवंकारं कथंकारं इत्थंकारं इत्थंभुंक्ते इत्यर्थः सिद्धेतिकिं शिरोऽन्यथा कृत्वा भुं
क्ते ॥ इति कृत्प्रक्रिया ॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा ॥ नियतोप
स्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिके

संख्यामात्रे प्रथमा स्यात् प्रातिपदिकार्थमात्रे उच्चैः नीचैः कृष्णः श्रीः ज्ञानं लिंगमात्रे ।
तटः तटी तटं परिमाणमात्रे द्रोणो व्रीहिः वचनं संख्या एकः द्वौ बहवः सम्बोधने च हे राम
कर्तुरीप्सिततमं कर्म कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् कर्मणि द्वितीया अ
नुक्ते कर्मणि द्वितीया स्यात् हरिं भजति अभिहिते तु कर्मादौ प्रथमा हरिः सेव्यते लक्ष्म्या
सेवितः अकथितं च अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् दुह्याच्
पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्व ह
हां गां दोग्धि पयः बलिं याचते वसुधां तण्डुलानोदनं पचति गर्गाञ्छतं दण्डयति व्रज
मवरुणद्धि गां माणवकं पन्थानं पृच्छति वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते ।
शास्ति वा शतं जयति देवदत्तं सुधां क्षीरनिधिं मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति जां
हरति कर्षति वहति वा अर्थनिबन्धनेयं संज्ञा बलिं भिक्षते वसुधां माणवकं धर्मं भाषते ।
अभिधत्ते वक्तीत्यादि स्वतंत्रः कर्तेति कर्तृसंज्ञा साधकतमं करणं क्रियासिद्धौ प्रकृ
ष्टोपकारकं करणं स्यात् कर्तृकरणयोस्तृतीया अनभिहिते कर्तरि करणे च तृतीया स्यात् ५८

गोभिर्गोवागोनहतोवाली कर्मणायमभिप्रैतिससंप्रदानं दानस्यकर्मणायमभिप्रैतिससंप्रदानसं
ज्ञः स्यात् चतुर्थीसंप्रदाने विप्रायगांददाति नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च एभिर्योगे
चतुर्थी हरयेनमः प्रजाभ्यःस्वस्ति अग्नयेस्वाहा पितृभ्यःस्वधा अलमितिपर्याप्त्यर्थग्रहणं तेन
दैत्येभ्योहरिरलंप्रभुःसमर्थःशक्तइत्यादि वषडिन्द्राय ध्रुवमपायेपादानं अपायोविश्लेषः
तस्मिन्साध्येयद्ध्रुवमवधिभूतमपादानं अपादानेपंचमी ग्रामादायाति धावतोऽश्वात्पततीत्यादि
षष्ठीशेषे कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसंबंधःशेषः तत्रषष्ठी राज्ञः
पुरुषः कारकस्यापिसंबंधमात्रविवक्षायांषष्ठ्येव सतांगतं सर्पिषोजानीते मातुःस्मरति
एधोदकस्योपस्कुरुते भजेशंभोश्चरणयोः फलानांतृप्तः कर्तृकर्मणोःकृति जगतःकर्ता
कृष्णः आधारोऽधिकरणं कर्तृकर्मद्वारातन्निष्ठक्रियाया आधारः कारकमधिकरणं सप्तम्यधिक
रणेच चाद्दूरान्तिकार्थेभ्यः औपश्लेषिकोवैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा कटेआस्ते स्थ
ल्यांपचति मोक्षेइच्छास्ति सर्वस्मिन्नात्मास्ति वनस्यदूरेअन्तिकेवा इतिविभक्त्यर्थाः ॥ ॥
समासःपंचधा तत्रसमसनंसमासः सचविशेषसंज्ञाविनिर्मुक्तः केवलसमासःप्रथमः

ल॰ प्रायेणापूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः प्रायेणोत्तरपदार्थप्रधानः तत्पुरुषः तृतीयः तत्पु
कौ॰ रुषभेदः कर्मधारयः तद्भेदो द्विगुः प्रायेणान्यपदार्थप्रधानो बहुव्रीहिः चतुर्थः प्रायेणोभयपदा
४८ र्थप्रधानो द्वंद्वः पंचमः समर्थः पदविधिः पदसंबंधी यो विधिः समर्थाश्रितो बोध्यः प्राक्कडारात्स
मासः कडाराः कर्मधारये इत्यतः प्राक्समास इत्यधिक्रियते सह सुपा सुप् सुपा सह वा समस्यते।
समासत्वात्प्रातिपदिकत्वेन सुपो लुक् परार्थाभिधानं वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यं
तधातुरूपाः पंच वृत्तयः वृत्त्यर्थावबोधकं वाक्यं विग्रहः स च लौकिकोऽलौकिकश्चेति द्विधा त
त्र पूर्वं भूत इति लौकिकं विग्रहार्थं पूर्व अम् भूत सु इत्यलौकिकः तत्र समासे कृते भूतपू
र्वः चरट् इति निर्देशात्पूर्वनिपातः भूतपूर्वः इवेन नित्यसमासो विभक्त्यलोपश्च
वागर्थाविव इति केवलसमासः अव्ययीभावः अधिकारोऽयं प्राक्तत्पुरुषात् अव्ययं विभ
क्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्य
संपत्तिसाकल्यान्तवचनेषु विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते अ
विग्रहो नित्यसमासः अस्वपदविग्रहो वा विभक्तौ इत्यधिक्रियते प्रथमानिर्दिष्टं ४८

समासउपसर्जनं समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं
प्राक्प्रयोज्यमित्यर्थः प्राक्प्रयोगः सुपोलुक् एकदेशविकृतमनन्यवत् प्रातिपदिकसंज्ञायांस्या
त्यनुवृत्तिः अव्ययीभावश्चेत्यव्ययत्वात्सुपोलुक् अधिहरि नाव्ययीभावा दतोम्त्वपंच
म्याः अदंतादव्ययीभावात्सुपोनलुक् तस्यपंचमींविनामादेशः कृष्णस्यसमीपमुपकृष्णं तृतीया
सप्तम्योर्बहुलं अदंतादव्ययीभावादम्भावः उपकृष्णेनोपकृष्णं उपकृष्णेउपकृष्णं मद्राणांसमृ
द्धिः सुमद्रं यवनानांव्यृद्धिः दुर्यवनं अव्ययीभावश्च नपुंसकं मक्षिकाणामभावोनिर्मक्षिकं हिम
स्यात्ययोतिहिमं निद्रासम्प्रतिनयुज्यतेतिनिद्रं हरशब्दस्यप्रकाशोइतिहरि विष्णोःपश्चादनुवि
ष्णु योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानियथार्थाः रूपस्ययोग्यमनुरूपं अर्थमर्थंप्रतिप्र
त्यर्थं शक्तिमनतिक्रम्य यथाशक्ति अव्ययीभावेचाकाले सहस्यसः स्यादव्ययीभावेनतुकाले
हरेःसादृश्यंसहरि ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेणयुगपत्सचक्रं सदृशःसख्याससखि क्ष
त्राणांसम्पत्तिःसक्षत्रं तृणमप्यपरित्यज्यसतृणं अग्निग्रन्थपर्यन्तमधीतेसाग्निः नदीभिश्च सं
ख्यावासमस्यते समाहारेचायमिष्यते पंचगंगं द्वियमुनं तद्धिताः आपंचसमासेष्वधिकारोयं

लं॰ कौ॰ ५९

59

अव्ययीभावे शरत्प्रभृतिभ्यः शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे शरदः समीपमुपशरदं प्रति
विपाशं जराया जरश्च उपजरसमित्यादि अनश्च अन्नन्तादव्ययीभावाट्टच् नस्तद्धिते नान्तस्य भस्य टेः
लोपस्तद्धिते उपराजमध्यात्मं नपुंसकादन्यतरस्यां अन्नन्तं यत्क्लीबं तदन्तादव्ययीभावात् टज्वा उ
पचर्मं झयः झयन्तादव्ययीभावात् टज्वा उपसमिधं उपसमित् इत्यव्ययीभावः तत्पुरुषः अधि
कारोऽयं प्राग्बहुव्रीहेः द्विगुश्च तत्पुरुषसंज्ञकः द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वि
तीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते कृष्णं श्रितः कृष्णश्रितः इत्यादि तृतीया तत्कृता
र्थेन गुणवचनेन तृतीयान्तं तृतीयान्तार्थकृतगुणेनार्थेन च सह प्राग्वत् शंकुलया खंडः शंकुला
खंडः धान्येनार्थो धान्यार्थः तत्कृतेन किं अक्ष्णा काणः कर्तृकरणे कृता बहुलं कर्तरि कर
णे च तृतीयान्तं कृदन्तेन बहुलं प्राग्वत् हरित्रातः नखभिन्नः कृत्ग्रहणे गतिकारकपूर्वस्यापि ग्र
हणं नखनिर्भिन्नः चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यन्तं तदर्थवाचिनार्थादिभिश्च
तुर्थ्यन्तं वा प्राग्वत् यूपाय दारु यूपदारु तदर्थेन प्रकृतिविकारभाव एवेष्टः तेनेह न रंधनाय स्था
ली अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः ५९

द्विजार्थं यवागूः भूतबलिः गोहितं गोसुखं गोरक्षितं पंचमीभयेन चौराद्भयं चौरभयं स्तोकांति
कस्वार्थदूरकृच्छ्राणि क्तेन पंचम्याः स्तोकादिभ्यः अलुक् उत्तरपदे परतः स्तोकान्मुक्तः अल्पान्मुक्तः
अंतिकादागतः अभ्याशादागतः दूरादागतः कृच्छ्रादागतः षष्ठी सुपेनेन प्राग्वत् राज्ञः पुरुषः
राजपुरुषः पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविना सह पूर्वादयः समस्यंते एकत्व
संख्याविशिष्टश्चेदवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः एकाधिकरणे किं पूर्वः
छात्राणां [illegible] चार्थे द्वंद्वः अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते [illegible]ः समुच्चयान्वाचयेतरे
तरयोगसमाहाराश्चार्थाः तत्र ईश्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः
समुच्चयः भिक्षामट गां चानयेत्यन्यतरस्यानुषंगिकत्वेनान्वयोन्वाचयः अनयोरसामर्थ्यात्स
मासो न धवखदिरौ छिंदि इति मिलितानामन्वय इतरेतरयोगः संज्ञापरिभाषमिति समूहः
समाहारः राजदंतादिषु परं एषु पूर्वप्रयोगार्हं परं स्यात् दंतानां राजा राजदंतः धर्मादिष्व
नियमः अर्थधर्मौ धर्मार्थावित्यादि द्वंद्वे घि पूर्वं स्यात् हरिहरौ अजाद्यदंतं द्वंद्वे ईशकृष्णौ अ
ल्पाच्तरं शिवकेशवौ द्वंद्वश्च प्राणितूर्यसेनांगानां एषां द्वंद्व एकवत् पाणिपादं मार्दंगि

ल.कौ.पं. 50

कपाणिविकं रथिकाश्वारोहं सर्वोऽपि द्वंद्वो विभाषैकवद्भवति द्वंद्वाच्चुदषहांतात्समाहारे चवर्गान्ता
द् षहान्ताच्च द्वंद्वाट्टच् स्यात्समाहारे वाक्च त्वक्च वाक्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहा
रे किं प्रावृट्शरदौ इति द्वंद्वः ऋक्पूरब्धूःपथामानक्षे ऋगाद्यंतस्य समासस्य अप्रत्ययोंतावयवः
अक्षे या धूः तदंतस्य न अर्धर्चः अंतर्वर्तिविभक्त्यापेक्षैव नेह अनृक्कसामबह्वृक्कसूक्तं विष्णुपुरं विम
लापं सरः द्व्यंतरुपसर्गेभ्योऽप ईत् द्वीपं अंतरीपं समीपं अवर्णान्ताद्वा प्रेपं प्रापं ऊदनोर्देशे अनू
पो देशः राजधुरा अक्षे तु अक्षधूः दृढधूरक्षः सखिपथः रम्यपथः अक्ष्णोऽदर्शनात् अच् स्यात् अदर्शना
र्थादक्ष्णोऽच् स्यात् गवामक्षीव गवाक्षः उपसर्गादध्वनः प्रगतोऽध्वानं प्राध्वो रथः नञ्जन्तात् प्रजया
र्थे नेभ्यः समासान्तास्स्युः सुराजा अतिराजा स्वतिभ्यामेव नेह परमराजः पथो विभाषा न
ञ् पूर्वात्पथो वा समासान्तः अपथं अपथः इति समासान्ताः समर्थानां प्रथमाद्वा इत्यधिक्रि
यते प्राक् दिशः इति यावत् प्राग्दीव्यतोऽण् तेन दीव्यतीत्यतः प्रागणाधिक्रियते अश्वपत्यादिभ्य
श्च एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेषु अश्वपतेरपत्यादि आश्वपतं गाणपतं दित्यदित्यादित्यप दिल्व२
त्युत्तरपदाण्ण्यः प्राग्दीव्यतीयेष्वर्थेषु दितेरपत्यादि दैत्यः अदितेरादित्यस्य वा आदित्यः प्राजा ५०

तद्धितेष्वचामादेः ॥ अचामादेरचो वृद्धिः
स्यात् ञिति णिति च तद्धिते परे ॥

यञः दैवयज्ञेयो दैवं दैवं बहिर्बहिलोपोऽपस्य वाहः ईकक् किति च प्रत्ययादेरचो
वृद्धिः किति तद्धिते वाहीकः गोत्रस्यादि प्रसंगे गोयन् इति यत्यादि विकारान्तार्थाः प्रत्ययाः
स्त्रीत्वं स्याम्यां न [illegible] भवन्तान् धाम्नां भवन्ते [illegible] ह्यामीमेनो स्तः स्त्रैणः पौंस्नः
नस्यापत्यं षष्ठ्यन्तात्कृतसंधेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्ययाः वा स्युः औपगवः
उवर्णान्तस्य भस्य गुणः तद्धिते उपगोरपत्यमौपगवः आश्वपतः दैत्यः औत्सः स्त्रैणः पौं-
स्नः अपत्यं पौत्रप्रभृति गोत्रं अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् एको गोत्रे गोत्रे
एक एव प्रत्ययः स्यात् उपगोर्गोत्रापत्यमौपगवः गर्गादिभ्यो यञ् गोत्रापत्ये गर्गस्य गो-
त्रापत्यं गार्ग्यः वात्स्यः यञञोश्च गोत्रे यञञोर्लुक् स्यात् तेन च बहुवचने [illegible]
तु बहुत्वे न तु स्त्रियां गर्गाः वत्साः जीवति तु वंश्ये युवा वंश्ये पित्रादौ जीवति पौत्रादे
यदपत्यं चतुर्थादि तद् युवसंज्ञमेव स्यात् गोत्राद्यून्यस्त्रियां प्रत्ययः गोत्रप्रत्ययान्तादेव तान्
प्रत्ययः स्यात् स्त्रियां तु युवसंज्ञा यञिञोश्च गोत्रे यौ यञिञौ तदन्तात् फक् गार्ग्यायणः
नीयियः फढखछघां प्रत्ययादीनां प्रत्ययादेः फस्यायन् ढस्यैय् [illegible]

लं॰
कों॰
५८
51

स्यादि यद्यपत्यस्य युः गर्गस्य युवापत्यं गार्ग्यायणः दाक्षायणः अनन्तरस्य अपत्ये दाक्षिः वल्क
स्यापत्यं वाल्कलिः उडुलोमिः उडुलोमी लोम्नोऽपत्येषु बहुषु अकारो वक्तव्यः बह्वादीनामपवादः
उडुलोमाः पौत्रप्रभृति गोत्रं अनन्तरापत्यं स्यात् विदादिभ्यः अन्यत्र तस्यापत्ये अणादयस्तदन्त्य
त्वगोत्रे विदस्य गोत्रं वैदः वैदौ विदाः पुत्रस्यापत्यं पौत्रः पौत्रौ पितृगोत्रादीनि सूत्रे पुत्रस्या
पत्यं पौत्रः पौत्रौ पित्राः यदि गोत्रादि तिस्तुत्रे प्रवरस्याय प्रसिद्धं गोत्रं तेनेदं न पौत्राः एवं प२५
दौहित्रादयः शिवादिभ्योऽण् अपत्ये शैवः गांगः ऋष्यन्धकवृष्णिकुरुभ्यश्च ऋषिभ्यः
वासिष्ठः वैश्वामित्रः अन्धकेभ्यः श्वाफल्कः वृष्णिभ्यः वासुदेवः कुरुभ्यः नाकुलः साह
देवः मातुरुत्संख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्य मातृशब्दस्य उः स्यादणि स्यात् अण्
प्रत्ययश्च द्वैमातुरो गणाधिपः इत्यमरः षाण्मातुरः शक्तिधरः इत्यमरः साम्मातुरः
भाद्रमातुरः स्त्रीभ्यो ढक् स्त्रीप्रत्ययान्तेभ्यो ढक् वैनतेयः कन्यायाः कनीन च बादरायणः का
नीनो व्यासः कर्णश्च राजश्वशुराद्यत् राज्ञो जातावेव येवाभावकर्मणोः यो हेतावदि
ते अश्वस्त्यास्यातन्तभावकर्मणोः राजन्यः जातावेवेति किं अन्यत्र राजा ५८
ग्रन्

नः श्रौघ्र्यः दयाङ्गः क्षत्रियः जानातेव क्षात्रियन्यः रेवत्यादिभ्यष्ठक् ठस्येकः अंगात्य

रस्य ठस्येकादेशः रैवतिकः क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् पंचाला

नां राजा पांचालः पूरोरण् पौरवः पांडोर्ड्यण् पांड्यः कुर्वादिभ्यो ण्यः कौरव्यः नै

षध्यः तेतद्राजाः अञादयः तद्राजसंज्ञाः स्युः तद्राजस्य बहुषु तेनैवास्त्रियां बहुत्वे

तद्राजस्य लुक् तत्कृतेव बहुत्वे न तु स्त्रियां पंचालाः इत्यादि कम्बोजाल्लुक् कम्बोजः कम्बो

जाः कम्बोजादिभ्य इति वक्तव्यं चोलः शकः केरलः यवनः इत्यपत्याधिकारः तेन रक्तं

रागात् काषायेण रक्तं वस्त्रं काषायं नक्षत्रेण युक्तः कालः तिष्यपुष्ययोर्नक्षत्राणि य

लोपः पुष्येण युक्तं पौषमहः लुबविशेषे सर्वैर्णविहितस्य लुप् षष्टिदंडात्मकस्य काल

स्यावांतरविशेषः चेन्न गम्यते अद्य पुष्यः दृष्टं साम तेनैतस्येव वसिष्ठेन दृष्टं वासिष्ठं साम वा

मदेवाड्ड्यड्ड्यौ वामदेवेन दृष्टं साम वामदेव्यं परिवृतो रथः वस्त्रेण परिवृतो रथः वास्त्रः वास्त्रो ३

समसमत्रेभ्यः शरावे उद्धृतः शारावः ओदनः संस्कृतं भक्षाः सप्तम्यंतादस्यास्मात् संस्कृतैय

यवैः संस्कृतं भक्षाः सप्तम्यंताद्दस्यास्मात् संस्कृतैर्यः यवैः संस्कृतं भक्ष्यास्ते ते स्युः भ्राष्ट्रेषु सं

स्कन्ताः आग्नुधानाः सास्य देवता इंद्रो देवता अस्य ऐंद्रं हविः पाशुपतं बार्हस्पत्यं प्राजापत्यं शु
क्रियं सोमाट्ट्यण् सौम्यं वाय्वृतुपित्रुषसो यत् वायव्यं ऋतव्यं अकृद्यकारे सार्वधातुके यकारे
चाऽपरे ऋतो रीङादेशः पित्र्यमिति च पित्र्यं उषस्यं पितृव्यमातुलमातामहपितामहाः एते नि
पात्यंते पितुर्भ्राता पितृव्यः मातुर्भ्राता मातुलः मातुः पिता मातामहः पितुः पिता पिता
महः तस्य समूहः काकानां समूहः काकं भिक्षादिभ्योऽण् भैक्षं गर्भिणीनां समूहो गा
र्भिणं इह भस्याढे तद्धिते पुंवद्भावः इति पुंवद्भावे कृते इनण्यनपत्ये अनपत्यार्थेऽणि इन्
प्रकृत्या नेन न स्यात् तद्धिते इति टिलोपो न युवतीनां समूहो यौवतं ग्रामता जनता बंधुता ग्रामजनबन्धु भ्यस्तल् २६
गजसहायाभ्यां चेति वक्तव्यं गजता सहायता अह्नः खः अह्नीनः अह्नः टखोरेव टिलोपः अ
हः समूहः अह्नाध्यः अहीनः अचित्तहस्तिधेनोष्ठक् इसुसुक्तान्तात्कः इस् उस् उक् तप्
तदंतात्यरस्य ठस्य कः साक्तुकं हास्तिकं धैनुकं तदधीते तद्वेद तदाभ्यां परिताभ्यां
वैति ताभ्यामेव पदोत्ताभ्यां पूर्वाभ्यां परस्य न वृद्धिः वितताभ्यां प्रवैयाकरणादेशा अर्थमा
सः व्याकरणमधीते वेत्ति वा वैयाकरणः क्रमादिभ्यो वुन् क्रमकः शिक्षकः मीमां ५२

पदकः २

सकः नदीस्मिन्नस्तीति देशो नद्यां मतुप् उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरो देशः तेन निर्वृत्तं
कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी तस्य निवासः शिबीनां निवासो देशः शैवः अ
दूरभवश्च विदिशाया अदूरभवं नगरं वैदिशं जनपदे लुप् जनपदे वाच्ये चातुरर्थि
कस्य लुप् लुपि युक्तवद्व्यक्तिवचने लुपि सति प्रकृतिवल्लिङ्गवचने स्तः पंचालानां
निवासो जनपदः पंचालाः कुरवः अंगाः वंगाः कलिंगाः वरणादिभ्यश्च अदूरभवं नग
रं वरणाः कुमुदनडवेतसेभ्यो ड्मतुप् झयः झयन्तान्मतोर्मस्य वः कुमुद्वान् नड्वान्।
मादुपधायाश्च मतोर्वोऽयवादिभ्यः मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जि
तात् परस्य मतोर्मस्य वः वेतस्वान् नडशादाड्ड्वलच् नड्वलः शाद्वलः शिखाया व
लच् शिखावलः इति चातुरर्थिकाः शेषे अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषः त
त्राणादयः स्युः चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः शब्दः औपनिषदः पुरुषः दृषदि पि
ष्टा दार्षदाः सक्तवः उलूखले क्षुण्णः औलूखलो यावकः अश्वैरुह्यते आश्वो रथः चतु
र्भिरुह्यते चातुरं शकटं चतुर्दश्यां दृश्यते चातुर्दशं रक्षः तस्य विकार इत्यतः प्राक्

ल्य

शेषाधिकारः राष्ट्रावारपाराद्घखौ राष्ट्रे जातादि राष्ट्रियः अवारपा
रीणः अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं अवारीणः पारीणः पारावारीणः
इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्था विशेषाः समर्थविभक्तयश्च व
क्ष्यन्ते ग्रामाद्यखञौ ग्राम्यः ग्रामीणः नद्यादिभ्यो ढक् नादेयं माहेयं वाराणसेयं दक्षिणा
पश्चात्पुरसस्त्यक् दाक्षिणात्यः पाश्चात्यः पौरस्त्यः द्युप्रागपागुदक्प्रतीचो यत् दिव्यं
प्राच्यं अपाच्यं उदीच्यं प्रतीच्यं कन्थायाष्ठक् कान्थिकः अव्ययात्त्यप् अमेहक्वतसित्रेभ्य एव
वक्तव्यमिति कमहार्थयोः अमात्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः त्यब्नेर्ध्रुवे नित्यः
वृद्धिर्यस्याचामादिस्तद्वृद्धं यस्य समुदायस्याचां मध्ये आदिर्वृद्धिः तद्वृद्धसंज्ञं स्यात् त्यदा
दीनि च वृद्धसंज्ञानि स्युः वृद्धाच्छः शालीयः तदीयः वा नामधेयस्य वृद्धसंज्ञा देवदत्ती
यः दैवदत्तः गहादिभ्यश्च गहीयः युष्मदस्मदोरन्यतरस्यां खञ्च चाच्छः पक्षेऽण्
एव यौष्माकं वा युष्मदीयः अस्मदीयः तस्मिन्नणि च युष्माकास्माकौ युष्मदस्मदो
रेकवचने यौष्माकीनः आस्माकीनः यौष्माकः आस्माकः तवक ५२

तवकममकावेकवचने ॥
एकवचने ॥

ममकौ स्तः त्वस्माणि च तावकीनः तावकः मामकीनः मामकः छे तु प्रत्ययोत्तरपदयोश्च
मपर्यंतयोरनयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च त्वदीयः मदीयः त्वत्पुत्रः मत्पु
त्रः मध्यान्मः मध्यमः कालाट्ठञ् मासिकं सांवत्सरिकं अव्ययानां भमात्रे टिलोपः सायंप्रा
तिकः पौनः पुनिकः प्रावृष एण्यः प्रावृषेण्यः संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेला
यां भवं सांधिवेलं ग्रैष्मं तैषं तिष्यपुष्ययोर्भाणि यलोपः सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्यु
ट्युलौ तुट् च सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ तयोस्तुट् च प्राग्वद
णः सायंतनं चिरंतनं चिरंतनं प्राह्णप्रगयोरेदंतत्वं निपात्यते प्राह्णेतनं प्रगेतनं दोषा
तनं दिवातनं तत्र जातः सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः स्रुघ्ने जातः (
स्रौघ्नः औत्सः राष्ट्रियः अवारपारीणः इत्यादि प्रावृषष्ठप् एण्यस्यापवादः प्रावृषिकः
प्रायभवः तत्रेत्येव स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः संभूते स्रुघ्ने संभवति स्रौघ्नः को
शाड्ढञ् कौशेयं वस्त्रं तत्र भवः स्रौघ्नः औत्सः राष्ट्रियः दिगादिभ्यो यत् दिश्यं वर्ग्यं श
रीरावयवाच्च दंत्यं कंठ्यं अध्यात्मादेष्ठञिष्यते अध्यात्मं भवमाध्यात्मिकं अव्ययात्तिका

ल॰ कौ॰ ५५

54

दीनां च एषाम्भवयपरत्वादिः त्रितिलिन्तिकितिच आधिदैविकं आधिभौतिकं ऐहलौकि
कं पारलौकिकं आकृतिगणोऽयं जिह्वामूलाङ्गुलेश्छः जिह्वामूलीयं वर्गान्ताच्च कवर्गीयं
ततआगतः स्रुघ्नादागतः स्रौघ्नः ठगायस्थानेभ्यः शुल्कशालाया आगतः शौल्कशालिकः
विद्यायोनिसम्बन्धेभ्यो वुञ् औपाध्यायकः पैतामहकः हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः
समादागतं समरूप्यं पक्षे गहादित्वाच्छः समीयं देवदत्तरूप्यं देवदत्तीयं हेतौ पंचमी।
मयट्च सममयं देवदत्तमयं प्रभवति हिमवतः प्रभवति हैमवती गंगा तद्गच्छति प
थिदूतयोः स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा अभिनिष्क्रामति द्वारं स्रुघ्नमभिनिष्क्राम
ति द्वारं स्रौघ्नं कान्यकुब्जं द्वारं अधिकृत्य कृते ग्रन्थे शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः
सोऽस्य निवासः स्रुघ्नो निवासोऽस्य स्रौघ्नः तेन प्रोक्तं पाणिनिना प्रोक्तं पाणिनीयं तस्येदं
गोविदमौपगवं इति शैषिकाः तस्य विकारः अश्मनो विकारे टिलोपः अश्मनो विकारः
आश्मः भास्मनः मार्त्तिकः अवयवे च प्राण्योषधिवृक्षेभ्यः चाद्विकारे मयूरस्य विका
रोऽवयवो वा मायूरः मौर्वं कांडं भस्म वा पैप्पलं मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। ५८

श्मनोविमयट्वास्याद्दिवागावयवयोः अश्ममयमाश्मनं अभक्ष्याच्छादनयोः किं मौद्गः सूपः का
र्पासमाच्छादनं नित्यंवृद्धशरादिभ्यः आम्रमयंशरमयं गोश्चपुरीषे गोमयं गोपयसोर्यत्
गव्यं पयस्यं इतिप्राग्दीव्यतीयाः प्राग्वहतेष्ठक् तद्वहतीत्यतःप्राक्ठगधिक्रियते तेन
दीव्यतिखनतिजयतिजितं अक्षैर्दीव्यति खनतिजयतिजितंवा आक्षिकः संस्कृतं द
ध्नासंस्कृतंदाधिकं मारिचिकं तरति उडुपेनतरति औडुपिकः चरति हस्तिनाचरति
कृ६ हास्तिकः दध्नासंसृष्टंदाधिकं उञ्छति बदराण्युञ्छतिबादरिकः रक्षति समाजंरक्षतिसा कृ६
माजिकः शब्ददर्दुरंकरोति शब्दंकरोति शाब्दिकः दर्दुरंकरोतिदार्दुरिकः धर्मंचरति
धार्मिकः अधर्माच्चेतिवक्तव्यं आधर्मिकः शिल्पं मृदंगवादनं शिल्पमस्य मार्दंगिकः
प्रहरणं असिःप्रहरणमस्य आसिकः धानुष्कः शीलं अपूपभक्षणं शीलमस्य आपूपि
कः छत्रादिभ्योणः गुरोर्दोषाणामावरणंछत्रंतच्छीलमस्येति छात्रः तत्रनियुक्तः ।
आकारेनियुक्तआकारिकः निकटेवसतिनैकटिकोभिक्षुः इतिठगधिकारः प्राग्घिता
द्यत् तस्मैहितमित्यतःप्राग्यदधिक्रियते तद्वहतिरथयुगप्रासंगं रथंवहतिरथ्यः धुरं

धुरं वहन्ति धुर्याः धुरो यड्ढकौ धुर्यः धौरेयः नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्ता
र्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु नावा तार्यं नाव्यं वयसा तुल्यो वयस्यः धर्मेण प्रा
प्यं धर्म्यं विषेण वध्यो विष्यः मूलेन आनाम्यं मूल्यं मूलेन समो मूल्यः सीतया संमितं
सीत्यं क्षेत्रं तुलया संमितं तुल्यं तत्र साधुः सामसु साधुः सामन्यः अग्र्यः कर्मण्यः शरण्य
सभायां यः सभ्यः इति यतोवधिः प्राक् क्रीताच्छः तेन क्रीतमित्यतश्छोऽधिक्रियते उग
वादिभ्यो यत् उवर्णान्तात् गवादिभ्यश्च यत् छस्यापवादः गव्यं हविष्यं तस्मै हितं वत्सेभ्यो
हितो वत्सीयो गोधुक् शङ्कव्यं दारु गव्यं हविष्यं शरीरावयवाद्यत् दन्त्यं कण्ठ्यं तस्मम्
आत्मन्विश्वजनभोगोत्तरपदात् खः आत्माध्वानौ खे छतो खे प्रकृत्यास्मः आत्मने हि
तं आत्मनीनं विश्वजनीनः मातृभोगीणः कुपतोः हितेनावधिः प्राग्वतेष्ठञ् तेन
तुल्यमित्यतः प्राक् ठञधिक्रियते आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् तेन क्रीतं ठञ्
सप्तत्या क्रीतं साप्ततिकं प्रास्थिकं तस्येश्वरः सर्वभूमिपृथिवीभ्यामणञौ स्तः अनुशा
तिकादीनां च सर्वभूमेरीश्वरः सार्वभौमः पार्थिवः पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचा

यान् षष्ठिसमर्थात्स्त्रीनित्यवन्निशान्ते पुत्रे वृद्धिशब्दात्तियान्तस्येन तदर्हति श्वेतच्छत्रमर्हतीति योगः श्वैत
च्छत्रिकः दंडादिभ्यः यः यत् दंडमर्हति दंड्यः मुसल्यः वध्यः तेन निर्वृत्तं अह्ना निर्वृत्तमाह्निकं
इति ठञावधिः तेन तुल्यं क्रिया चेद्वतिः ब्राह्मणेन तुल्यं ब्राह्मणवदधीते क्रिया चेत् किं गुणतुल्ये
स्यः ४ मा भूत् पुत्रेण तु[ल्यः] स्थूलः तत्र तस्येव मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः चैत्रस्येव चैत्रव
त् मैत्रस्य गावः तस्य भावः त्वतलौ प्रकृतिजन्यबोधे प्रकारो भावः गोर्भावो गोत्वं गोता त लौ त
स्त्रियां त्वान्तं क्लीबं आ च त्वात् ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते अपवादैः सह समावे
शार्थमिदं चकारो नञ्स्नञ् [...]मपि समावेशार्थमिदं स्त्रियो भावः स्त्रैणं स्त्रीत्वं स्त्रीता पौंस्नं
स्त्रा ५ पुंस्त्वं पुंस्ता पृथ्वादिभ्य इमनिज्वा वावचनमणादिसमावेशार्थं र ऋतो हलादेर्लघोः इति इष्ठेमेयस्सु
टेर्लोपः इष्ठेमेयस्सु पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वं पृथोर्भावः प्रथिमा इगन्ता
च्च लघुपूर्वात् अण् पार्थिवं म्रदिमा मार्दवं वर्णदृढादिभ्यः ष्यञ्च चादिमनिच् शौक्ल्यं शुक्लि
मा दार्ढ्यं द्रढिमा गुणवचनब्राह्मणादिभ्यः कर्मणि च चाद्भावे ष्यञ्भावः कर्म वा जाड्यं मौढ्यं
ब्राह्मण्यं आकृतिगणोऽयं सख्युर्यः सख्यं कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यन्तपुरोहितादिभ्यो

स

ल: कौ: ५९

यक् सेनापत्यं पौरोहित्यं इति तद्धिताधिकारः धान्यानां भवने क्षेत्रे खञ् मुद्गानां भवनं क्षेत्रं मौद्गीनं
व्रीहिशाल्योर्ढक् व्रैहेयं शालेयं हैयंगवीनं संज्ञायां नवनीतेति पाठान्तरं तदस्य संजातं तारकादिभ्य
इतच् तारकाः संजाता अस्य तारकितं नभः पंडितः मात्राङ्कितगणोयं प्रमाणे द्वयसज्दघ्नञ्मात्रचः ऊरु
प्रमाणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं यत्तदेतेभ्यः परिमाणे वतुप् यत्परिमाणमस्य यावान् तावान्
एतावान् संख्याया अवयवे तयप् पंचावयवा अस्य पंचतयं द्वित्रिभ्यां तयस्यायज्वा द्वयं द्वितयं त्रयं त्रि
तयं उभादुदात्तो नित्यं उभशब्दात्तयपोयच्स्यात्सचाद्युदात्तः उभयं तस्य पूरणे डट् एकादशानां पू
रण एकादशः नान्तादसंख्यादेर्मट् डटो मडागमः पंचानां पूरणः पंचमः नान्तात्किं नेविंशतेः डति
विंशतेर्भस्य तिशब्दस्य लोपो डिति परे विंशः असंख्यादेः किं एकादशः षट्कतिकतिपयचतुरां
थुक् डति षण्णां पूरणः षष्ठः कतिपयशब्दस्यानत्वेपि डट् कतिपयथः चतुर्थः द्वेस्तीयः डटोपवादः
द्वयोः पूरणो द्वितीयः त्रेः संप्रसारणं च तृतीयः श्रोत्रियंश्छन्दोधीते श्रोत्रियः वेत्यनवेत्नक्रांदसः
पूर्वादिनिः पूर्वं जातमनेन पूर्वी सपूर्वाच्च कृतपूर्वी [redacted] इष्टादिभ्यश्च
इष्टमनेन तष्टी अधीती तदस्यास्त्यस्मिन्निति मतुप् गावोऽस्यास्मिन्वा संति गोमान् सोमान्तर्षे। ५९

कौ
तोनसांतोभसंज्ञौ मत्वर्थे प्रत्यये संप्रसारणं विदुष्मान् गुणवचनेभ्यो मतुपो लुक् विदुः शुक्लो गुणोस्या
स्ति शुक्लः पटः कृष्णः प्राणिस्थादातो लजन्यतरस्यां चूडालः चूडावान् प्राणिस्थात्किं शिखावान्दीपः।
प्राणिग्रहणं रवेस्त्वेनेह मेधावान् लोमादि पामादि पिच्छादिभ्यः शनेलचः लोमादिभ्यः शः लोमवान्
लोमशः पामादिभ्यो नः पामनः अंगात्कल्याणे अंगना लक्ष्म्या अ लक्ष्मणः पिच्छादिभ्य इलच्
पिच्छिलः पिच्छावान् दंत उन्नत उरच् उन्नता दंता अस्य दंतुरः केशाद्वोन्यतरस्यां केशवः केशवा
न् अन्येभ्योपि दृश्यते मणिवः अर्णसो लोपश्च अर्णवः अत इनिठनौ दंडी दंडिकः व्रीह्यादिभ्यश्च।
व्रीही व्रीहिकः अस्मायामेधास्रजो विनिः यशस्वी यशस्वान् मायावी मेधावी स्रग्वी वाचो ग्मि
निः वाग्मी अर्श आदिभ्योच् अर्शसः आकृतिगणोयं इति मत्वर्थीयाः प्राग्दिशो विभक्तिः दिक्
शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः अथ स्वार्थिकाः किंसर्वनामबहुभ्योऽद्व्यादि
भ्यः किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोधिक्रियते पंचम्यास्तसिल् पंचम्यंतेभ्यः किमादिभ्यः
तसिल्वा स्यात् कुतिहोः किमः कुः स्यात् तादौ हादौ च विभक्तौ कुतः कस्मात् इदम इश् प्राग्दिशीये
इतः एतदोऽन् एतदः प्राग्दिशीये अनेकाल्त्वात्सर्वादेशः अतः अमुतः यततः ततः बहुतः द्व्यादेस्तु।

ल॰ कौ॰ ५८

57

द्वाभ्यां पर्यभिभ्यां च तसिल् परितः सर्वतः इत्यर्थः । सुभिन्न उभयतः इत्यर्थः सप्तम्यास्त्रल् कुत्र यत्र त
त्र इदमो हः नहि लोपवादः इह किमोत् वा स्यात् क्वाति किमः क्वः कुत्र इतराभ्योपि दृश्यते पंचमीसप्तमी
तर विभक्त्यंतादपि तसिलादयो दृश्यंते दीपाग्रहणाद्भवदादियोग एव स भवान् ततोभवान् तत्रभवान्
तं भवंतं ततोभवंतं तत्रभवंतं एवं दीर्घायुः देवानांप्रियः आयुष्मान् सर्वैकान्यकिंयत्तदः काले दा स
प्तम्यंतेभ्यः एभ्यः कालार्थे दा स्यात् सर्वस्य सोन्यतरस्यां दिषु दा दौ प्राग्दिशीये सर्वस्य सो वा सर्वस्मिन्
काले सदा सर्वदा एकदा अन्यदा कदा यदा तदा काले किं सर्वत्रदेशे इदमो र्हिल् सप्तम्यंतात् ए
तेतो रथो इदम एतेतौ लः रेफादौ थकारादौ च प्राग्दिशीये परे अस्मिन्काले एतर्हि काले किं इह देशे
अधुना इदमो निपातोयं दानीं च इदमो दानीं प्रत्ययः काले इदानीं तदो दा च तदा तदानीं अन
द्यतने र्हिलन्यतरस्यां कर्हि कदा यर्हि यदा तर्हि तदा एतदः एत इत एतेतौ रेफादौ थादौ च प्राग्दि
शीये एतस्मिन्काले एतर्हि प्रकारवचने थाल् तेन प्रकारेण तथा यथा इदमस्थमुः थालोपवादः
एतदोपि वाच्यः अनेन एतेन वा प्रकारेण इत्थं किमश्च केन प्रकारेण कथं इति प्राग्दिशीयाः अतिशा
यने तमबिष्ठनौ अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः अयमेषामतिशयेनाढ्यः आढ्यतमः । ५८

८ नौ

घा

लघुतमो लघिष्ठः । तिङश्च तिङन्तादतिशये द्योत्ये तमप्तरपौ स्तः । किमेत्तिङव्ययघादाम्वद्र
व्यप्रकर्षे किमेदन्तात्तिङोऽव्ययाच्च यो घः तदन्तादाम् स्यात् न तु द्रव्यप्रकर्षे । किंतमां प्राह्णेतमां प
चतितमां उच्चैस्तमां द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः । द्विवचनविभज्योपपदे तरबीयसुनौ । द्वयोरे
कस्यातिशये विभक्तव्ये चोपपदे सति इमौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुः
लघुतरः लघीयान् उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः । प्रशस्यस्य श्रः । इष्ठेयसोः परतः प्रश 65
स्यैकाच् इष्ठादौ एकाच् प्रकृत्या स्यात् श्रेष्ठः श्रेयान् ज्य च प्रशस्यस्य ज्यादेशः इष्ठेयसोः ज्येष्ठः ज्या
दादीयसः आदेः परस्य ज्यायान् बहोर्लोपो भू च बहोः । बहोः परयोरिष्ठेयसोर्लोपः स्यात् बहो
श्च भूरादेशः भूमा इष्ठस्य यिट् च बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च भूयिष्ठः विन्मतोर्लु
क् इष्ठेयसोः अतिशयेन स्रग्वी स्रजिष्ठः स्रजीयान् अतिशयेन त्वग्वान् त्वचिष्ठः ईषदसमाप्तौ
कल्पब्देश्यदेशीयरः ईषदूनो विद्वान् विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः पचतिकल्पं वि
भाषा सुपो बहुच् पुरस्तात्तु ईषदूनः पटुः बहुपटुः पटुकल्पः सुपः किं पचतिकल्पं प्रागिवात्कः ।
इवे प्रतिकृतौ इत्यतः प्रागधिकारः अव्ययसर्वनाम्नामकच् प्राक् टेः कापवादः अज्ञाते के स्माय

क्ता

ष्णोः ष्णकः उच्चकैः नीचकैः सर्वकैः कुत्सिते कुत्सितोऽश्वोऽश्वकः किंयत्तदो निर्धारणे द्वयोरेकस्य ड-
तरच् अनयोः कतरो वैष्णवः यतरः ततरः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां मध्ये निर्धार-
णे डतमच् वा स्यात् जातिपरिप्रश्न इति प्रत्याख्यातमाकरे कतमो भवतां कठः यतमः ततमः वा
ग्रहणमकजर्थं यकः सकः इति प्राणिनीयाः इवे प्रतिकृतौ कन्स्यात् अश्व इव प्रकृतिरश्वकः सर्व-
प्रातिपदिकेभ्यः स्वार्थे कन् अश्वकः तत्प्रकृतवचने मयट् प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं
प्रतिपादनं भावेऽधिकरणे प्रस्तुतं प्रस्तुतेन स्ववचनं प्रतिपादनं ल्युट् आद्ये प्रकृतमन्नमयं अन्नमयं
अपूपमयं द्वितीये अन्नमयो यज्ञः अन्नमयं पर्व प्रज्ञादिभ्यश्च अण् स्यात् प्रज्ञ एव प्राज्ञः दैवतः
बांधवः बह्वल्पार्थाच्छस्कारकादन्यतरस्यां बहूनि ददाति बहुशः अल्पशः आद्यादिभ्यस्तसेरुप-
संख्यानं आदौ आदितः मध्यतः अंततः पृष्ठतः पार्श्वतः आकृतिगणोऽयं स्वरेण स्वरतो वर्णेन वर्णतः :
कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः अभूततद्भाव इति वक्तव्यं विकारात्मतां प्राप्नुवन्तां प्रकृतौ वर्तमाना
द्विकारशब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिर्योगे अस्य च्वौ अवर्णस्य ईत् स्यात् च्वौ च अकृष्णः कृ-
ष्णः संपद्यते तं करोति कृष्णीकरोति ब्रह्मीकरोति गंगीभवति अव्ययस्य च्वावीत्वं नेति वाच्यं दोषा

भूतमहः दिवाभूता रात्रिः विभाषा साति कार्त्स्न्ये ... विषये साति वा स्यात् साकल्ये सात्प्रत्ययोऽयं भस्म
सात्त्वेन दधि सिंचति कृत्स्नं शस्त्रम् अग्निः सम्पद्यते अग्निसाद्भवति ... दीर्घः स्यात् अग्नीभवति अ
व्यक्तानुकरणात् अजवरार्धात् डतितौ डाच् अजवरं नूनं नन्नन्तेना नूनम् अनेकाजिति पावत् मा
त्रा समर्थे पचन स्यात् गव् स्यात् कृभ्वस्तिभिर्योगे डाचि बहुलं द्वे भवतः इति डाचि विव दितेति
त्वे ... इति परसमस्यां त्वेन च्चाप्रत्ययः स्यात् डाचि विवदितेति कृते दितेति सन्निय
जवरार्धेना... डाति नित्यभावः नित्यमाम्रेडिते तस्मिन् परे पूर्वपरयोर्वर्णयोः पर
रूपं स्यात् इति तकारपकारयोः पकारः पटपटाकरोति अव्यक्तानुकरणात् किं दृषत्करोति
द्व्यजवरार्धात् किं श्रत्करोति अवरेति किं खरटखरटाकरोति अनितौ किं पटिति करोति ॥
इति तद्धिताः ॥ अथ स्त्रीप्रत्ययाः अजाद्यतष्टाप् अजादीनामकारान्तस्य वाच्यं यत्स्त्रीत्वं तद
द्योतये टाप् स्यात् अजा एडका अश्वा चटका मूषिका बाला वत्सा होडा मंदा विलाता मेधा र
माति गंगा सर्वा ऋतेभ्यो ङीप् वंकी दलिनी उगितश्च उगिदंतान्नाम्नि पदिकात् ङीप् भवंती प
चंती उगिदचामिति सूत्रे अच् ग्रहणेन धातोरुगित्वात् न ङीप् तेनैव उखास्रत् पर्णध्वत्

ल॰ कौ॰ ५९

59

तयप्ठक्ठञ्कञ्क्वरपः

अस्यैव लुक्स्यादेव प्राची प्रतीची टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्छ्वुपत्रकाणकरपः अनुपसर्जनं यत्
टिदादि तदन्तं यददन्तं ततो ङीप् कुरुचरी नदट् नदी देवट् देवी सौपर्णेयी ऐन्द्री औत्सी ऊरुद्वय
सी ऊरुदघ्नी ऊरुमात्री पंचतयी आक्षिकी लावणिकी यादृशी इत्वरी नञ्स्नञीकक्ख्युं
स्तरुण तलुनानांच स्त्रैणी पौंस्नी शाक्तीकी आढ्यंकरणी तरुणी तलुनी यञश्च यञंतान्
ङीप् अकारलोपे कृते हलस्तद्धितस्य हलः परस्य तद्धित यकारस्य लोपः ईति परे गार्गी प्राचां
ष्फ तद्धितः यञंतात् ष्फो वा स्यात् स च तद्धितः षिद्गौरादिभ्यश्च ङीष् स्यात् गार्ग्यायणी नर्तकी
गौरी अनडुही अनड्वाही आमनडुहः स्त्रियां वा वयसि प्रथमे प्रथमवयोवाचिनोऽदंतान् ङीप् कुमारी
द्विगोर्ङीप् त्रिलोकी अजादित्वात् त्रिफला त्र्यनीका वर्णादनुदात्तात्तोपधात्तो नः वर्णवाची यो
ऽनुदात्तस्तोपधस्तदंतादनुपसर्जनाद्वा ङीप् नकारस्य नश्च एता एनी रोहिता रोहिणी वोतो
गुणवचनात् उदंताद्गुणवाचिनो वा ङीष् मृद्वी मृदुः बह्वादिभ्यश्च वा ङीष् बह्वी बहुः कृदिका
रादक्तिनः रात्रिः रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटिः शकटी पुंयोगादाख्यायां या पुमा
ख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष् गोपस्य स्त्री गोपी पालकान्ता गोपालिका अश्वपालिका ५९

न्न

प्रत्ययस्थात्कात्पूर्वस्यात इः स्यादापि सुपः प्रत्ययस्थात्कात्पूर्वस्याकारस्येकारः स्यात आपि सर्वात्सुपः
परे न चेत् सर्विका कारिका अतः किं नौका प्रत्ययस्थात्किं शक्नोतीति शका असुपः किं बहु
परिव्राजका नगरी सूर्याद्देवतायां चाप् सूर्यस्य स्त्री देवता सूर्या देवतायां किं सूर्यागस्त्ययोश्छे
च ङ्यां च यलोपः सूरी आगस्ती इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्या
णामानुक् ङीप् च इंद्रस्य स्त्री इंद्राणी वरुणानी भवानी शर्वाणी रुद्राणी मृडानी हिमारण्य
योर्महत्त्वे महद्धिमं हिमानी महदरण्यमरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां
यवनानां लिपिर्यवनानी मातुलोपाध्याययोरानग्वा मातुलानी मातुली उपाध्यायानी
उपाध्यायी आचार्यादणत्वं च आचार्यानी आर्यक्षत्रियाभ्यां वा स्वार्थे आर्याणी आर्या क्ष
त्रियाणी क्षत्रिया क्रीतात्करणपूर्वात् ङीप् वस्त्रक्रीती क्वचिन्न धनक्रीता स्वांगाच्चोपस
र्जनादसंयोगोपधात् असंयोगोपधं उपसर्जनं यत्स्वांगं तदन्तात् ङीप् वा केशानतिक्रांता
अतिकेशी अतिकेशा चंद्रमुखी चंद्रमुखा संयोगोपधात्तु सुगुल्फा उपसर्जनात्किं सशि
खा नक्रोडादिबह्वचः क्रोडादेर्बह्वचश्च स्वांगान्न ङीप् कल्याणक्रोडा आहृतिगणोयं सुजघना

लः कौः ८ः

नखमुखात्संज्ञायां नङीष् पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञा
यां न तु गकारव्यवधाने शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या जातेरस्त्रीविषयादयो
पधात् जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततो ङीष् तटी वृषली कठी बह्वृची जातेः किं
मुण्डा अस्त्रीविषयात्किं बलाका अयोपधात्किं क्षत्रिया योपधप्रतिषेधे गवयहयमुकय
मत्स्यमनुष्याणामप्रतिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलोपः मनुषी मत्स्य
ङ्गाय स्य[illegible]लोपः मत्सी इतो मनुष्यजातेः ङीष् स्यात् दाक्षी ऊङुतः उकारान्ताद्योपधान्मनुष्यजाति
वाचिनः स्त्रियामूङ् [illegible] अयोपधात्किं अध्वर्युः ब्राह्मणी पंगोश्च पंगूः श्वशुरस्योकाराका
रलोपश्च श्वश्रूः ऊरूत्तरपदादौपम्ये उपमानवाचि पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मा
दूङ् करभोरूः संहितशफलक्षणवामादेश्च एतेनौपम्यार्थं सूत्रं संहितोरूः शफोरूः ल
क्षणोरूः वामोरूः शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादेरञोकारस्तदंतात् जातिवाचिनो ङीन् स्यात्
शार्ङ्गरवी ब्राह्मणी वैदी नृनरयोर्वृद्धिश्च नारी यूनस्तिः युवन्शब्दात् स्त्रियां तिः स्यात् युवतिः
इति स्त्रीप्रत्ययाः ॥ सिद्धांतकौमुदीशब्दकौस्तुभाभोगभोगतः चन्द्रशेखरदासजः श्रील ८

ल॰
कौ॰
८१ 61

लघुसिद्धांतकौमुदी ॥ इतिश्रीवरदराजकृतालघुसिद्धांतकौमुदीसमाप्तेतिभद्रम् ॥ ॥
शुभमस्तुलेखकपाठकयोः ॥ श्रीगणेशायनमः ॥ ॥

नं. १२८८६
लघुसिद्धान्तकौमुदी

